M2435

M2435

M2-35

२१



॥श्रीगणेशाय नमः॥ अर्द्धांगीकृतदारापत्यमपि गाढानुरागि यत्॥ पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः॥१॥
आलंबे जगदालंबे हेरंबचरणांबुजे॥ शुष्यंति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्द्धयः॥२॥ तद्दिव्यमव्ययं
धाम सारस्वतमुपास्महे॥ यत्प्रसादात्प्रलीयंते मोहांधतमसश्छटाः॥३॥ वाणीं काणभुजीमजीग
णद्वाशासीच्च वैयासकीमंतस्तंत्रमरंस्त पन्नगगवीगुंफेषु चाजागरीत्॥ वाचामाकलयद्रहस्यमखि
लं यश्चाक्षपादस्फुरां लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः॥४॥ मल्लिनाथकविः सोयं मंदा
त्मानुजिघृक्षया॥ तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति॥५॥ नालिकेरफलसंमितं वचो भा
रवेः सपदि तद्विभज्यते॥ स्वादयंतु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितं॥६॥ नानानिबंधवि
षमैकपदे नितांतं शाब्दांकचंक्रमणखिन्नधियामशंकं॥ कर्तुं प्रवेशमिह भारविकाव्यबंधे घंटापथं
कमपि नूतनमातनिष्ये॥७॥ लिंगसंख्याविभेदेपि विशेषणविशेष्ययोः॥ विभक्तिः पुनरेकैव विशे
षणविशेषता॥८॥ इहान्वयमुखेनैव सर्वं व्याख्यायते मया॥ नामूलं लिख्यते किंचिन्नानपेक्षितमु
च्यते॥९॥ अथ तत्र भवान्भारविर्नाम महाकविः काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये॥
सद्यः परनिर्वृत्तये कांतासंमिततयोपदेशयुजे इत्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसा

धनंतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् किरातार्जुनीयाख्यं महा
काव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वाद्दाशीर्नमस्क्रियावा
स्तु निर्देशो वापि तन्मुखमित्याशीर्वादाद्यन्यतमस्य प्रबंधमुखलक्षणत्वात् वनेचरस्य युधिष्ठिरप्रा ति
पं वस्तु निर्दिशन् प्रतिपाद्यकथामुपक्षिपति॥ श्रिय इति॥ आदितः श्रीशब्दप्रयोगात् वर्णगणादिदोषसि
द्धिर्नात्रोपयुज्यते॥ तदुक्तं॥ देवतावाचकाः शब्दा ये च भद्रादिवाचकाः॥ ते सर्वे नैव निंद्याः स्युर्लिपितो गणतो

॥श्रीगणेशायनमः॥ ॥श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुंक्त वेदितुं॥
स वर्णिलिंगी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१॥ टीम॥ ॥ ॥ ॥

पि वा॥ कुरूणां निवासाः कुरवः जनपदास्तस्य निवासइत्यण्प्रत्ययः॥ जनपदे लुप्॥ तेषामधिपस्य दुर्योध
नस्य संबंधिनीं॥ शेषे षष्ठी॥ वित्ति श्रियो राज्यलक्ष्म्याः कर्तरि कर्मणोः कृतीति कर्मणि षष्ठी॥ पाल्यते अनया
इति पालनी तां प्रतिष्ठापिकामित्यर्थः॥ प्रजारंजनमूलत्वात्संपद इति भावः॥ करणाधिकरणयोश्चेति करणे ल्यु
ट्॥ टिड्ढाणञित्यादिना ङीप्॥ प्रजासु जनेषु विषये॥ प्रजास्यात्संततौ जने इत्यमरः॥ वृत्तिं व्यवहारं वेदितुं ज्ञातुं य
वनेचरं अयुंक्त नियुक्तवान्॥ वर्णः प्रशस्तिः पालाशादंडो वा॥ स्यात्स्तौ नि वर्णी ब्रह्मचारी॥ वर्णः पालाशदंडे
स्यादिति मेदिनी तदुक्तं॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं॥ संकल्पो ध्यवसायश्च क्रियानिर्वृत्तिरेव च॥

२२

२ वर्णीस्याल्लेखके चित्रकारि पिब्र
ह्मचारिणीति विश्वः॥२

कि॰ त॰ प्र॰ भ॰
हेरंब
॥२॥

स॰ सटीक

२ स

एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं ॥ एतदष्टविधमैथुनाभावः आश्रमि
वर्णाद्ब्रह्मचारिणीति निघंटुः ॥ तस्य लिंगं चिह्नमस्यास्तीति वर्णिलिंगी ॥ ब्रह्मचारी वेषवानित्यर्थः ॥ नियुक्तः ॥
वनेचरतीति वनेचरः किरातः भिल्लः किरातशबरपुलिंदा म्लेच्छजातयः इत्यमरः ॥ चरेष्टः इति टप्रत्ययः ॥
तत्पुरुषे कृति बहुलमित्यलुक् ॥ विदितं वेदनमस्यास्तीति विदितः स्वपरराष्ट्रवृत्तांतज्ञानवानित्यर्थः ॥
अर्शआदिभ्योऽच्प्रत्ययः ॥ अथवा कर्तरि कर्मधर्मोपचाराद्विदितवृत्तांतो विदित इत्युच्यते ॥ उभ
यथाऽपि पीता गावो भुक्ता ब्राह्मणा विभक्ता भ्रातर इत्यादिवत्साधुत्वं न तु कर्तरि क्तः ॥ सकर्मकेभ्य
स्तस्य विधानाभावात् ॥ अत एव भाष्यकारः ॥ अकारो मत्वर्थीयः विभक्तमेषामस्तीति विभक्ताः ॥
पीतमेषामस्तीति पीताः ॥ भुक्तमेषामस्तीति भुक्ता इति सर्वत्र ॥ अथवा उत्तरपदलोपो द्रष्टव्यः ॥ त्र५
विभक्तं धनं ये स्ते विभक्ताः ॥ पीतमुदकं यैस्ते पीतोदकाः ॥ भुक्तमन्नं यैस्ते भुक्तान्नाः ॥ अत्र लोप
ग प्रदर्शनार्थमाह कैयटः ॥ गम्यमानार्थस्याप्रयोग एव लोपोऽभिमतः ॥ विभक्ता भ्रातर इत्यत्र धनस्य यद्विभ
क्तत्वं तत् भ्रातृषूपचर्यते ॥ पीतोदका गाव इत्यत्राप्युदकस्य पीतत्वं तत् गोष्वारोप्यत इति भुक्तान्ना ब्राह्मणा इ
त्यत्रापि अन्नस्य भुक्तत्वं ब्राह्मणेषूपचर्यते ॥ तद्वदत्रापि वृत्तिगतं विदितत्वं वक्तरि वनेचरे उपचर्यते ॥
एतेन वनाय पीतप्रतिबद्धवत्सां पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु चैवमादयो व्याख्याताः ॥ अथवा

शिवराम
॥२॥

विदितोविदितवान् सकर्मकात्स्य विवक्षितेकर्मणि कर्त्तरिक्तः॥ अथस्माद्ग्निनितः कर्त्तस्यादीयथाह॥ धातोरर्थांत
रेवृत्तेर्धात्वर्थेनोपसंग्रहात्॥ प्रसिद्धेर विवक्षातः कर्मणोकर्मिकाक्रियेति॥ द्वैतवनेद्वैतास्येन्न पोवने॥ द्वाद्वीतो
गतौ यस्मात्त तद्द्वितं द्वितमेवद्वैतं द्वैतं चतद्वनं चद्वैतवनं तस्मिन्द्वैतवनेशोकमोहावर्जितस्यर्थः॥ युधिस्थिरं
स्थिरं युधिष्टिरं धर्मराजं॥ हलंतात्सप्तम्याः सज्ञायामित्यलुक्॥ गविवियुधिभ्यांस्थिरइतिषत्वं समोयपोस
प्राप्तः॥ अत्रवनेचरइतिहयोः॥ स्वरव्यंजनसमुदायपौरुक्त्यं अनुप्रासोनामालंकारः॥ अस्मिन् सर्गेवंशस्थ
वृत्तं॥ तल्लक्षणंतुजतौतुवंशस्थमुदीरितंजराविति॥ १॥ कृतप्रणामस्यति॥ तत्कालोचितत्वात्कृतनमस्कारस्य॥
कृतप्रणामस्यमहीमहीभुजे जितांसपत्नेननिवेदयिष्यतः॥ नविव्यथेतस्यमनोनहिप्रियंप्रवक्तुमिच्छंतिमृ
सापत्नेनरिपुणाद्युर्योधनेनरिपुर्वैरिसपत्नारिद्विषद्वेषणदुर्हृदइत्यमरः॥ जितांस्वायत्तीकृतांमहींमही
भुजेयुधिष्ठिराय॥ क्रियाग्रहणात्संप्रदानत्वं॥ निवेदयिष्यतोज्ञापयिष्यतः॥ ऌटः सद्वेतिशतृप्रत्ययः॥ तस्य
वनेचरस्यमनोनविव्यथे॥ कथमिदंकुत्र अप्रियंराज्ञेविज्ञापयामीतिमनसिनचचालेत्यर्थः॥ व्यथभय
न चलनयोरितिधातोर्लिट्॥ उक्तमर्थमर्थांतरन्यासेनसमर्थयते॥ नहीति॥ हियस्मात्कारणाद्धितमिच्छंती
ति हितैषिणः स्वामिहितार्थिनः पुरुषाः मृषामिथ्याभूतं प्रियंवक्तुंनेच्छंति॥ अन्यथाकार्यविघातकत्वात्सा
ति मिद्रोहिणः स्युरितिभावः॥ अमोघममाघममृषाभाषितमप्यूहकत्वंचेतिचारगुणाइतिनीतिवाक्यात्॥ २॥
पद्व ×१ अर्थांतरन्यासोलंकारः॥ सामान्यविशेषकार्यकारणभावाभ्यांनिर्दिष्टप्रकृ
तसमर्थनमर्थांतरन्यासः॥ १॥

कि० टी० ७ व

कथं

तथापि प्रियार्हैरास्तिंकटुनिष्ठुरोक्तिरनुचितेत्याशंक्य स्वाम्यनुज्ञयानदूषपतीत्याशयेनाह ॥ द्विषामिति ॥
रहस्यकांते ॥ सवनेचरः द्विषां शत्रूणां कर्मणि षष्ठी ॥ विघाताय द्विषो विहंतुमित्यर्थः ॥ तुमर्थाच्च भाववचना
दिति चतुर्थी ॥ भाववचनाश्चेति तुमर्थे ॥ घञ् प्रत्ययः ॥ अत्र तादर्थ्यमपि न दोषः ॥ तथापि प्रयोगवैचित्र्ये विशेष
स्याप्यलंकारत्वादेवं व्याचक्षते ॥ विधातुं व्यापारं कर्तुं इच्छतः समानकर्तृकेषु इति तुमुन् ॥ द्विषो विहंतु
मुद्युक्तमानसेत्यर्थः ॥ अतएव भूभर्त्ता युधिष्ठिरस्यानुज्ञाम अधिगम्य ॥ सुष्ठु भावः सौष्ठवं शास्त्रसाम

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ॥
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥३॥

र्थ्यं सुष्ठुशब्दाद्व्ययाद्युद्गात्रादित्वाद् अण् प्रत्ययः ॥ उदारस्य भावः औदार्यं अर्थसंपत्तिः ॥ तयो
र्द्वंद्वः सौष्ठवौदार्ये ॥ अत्रौदार्यशब्दस्यो जाद्यंतत्वेति लक्षणहेत्वेः क्रियायाः इस्त्याक्षरस्यापि हेतुरु
ष्टस्य पूर्वनिपातमकुर्वता सलक्षणले यपूर्वनिपातस्यानित्यत्वं ज्ञापनाद [illegible] पूर्वनिपातः ॥ तदुक्तं च
काशिकायां ॥ अयमेव लक्षणहेत्वोरिति निर्देशः ॥ पूर्वनिपातव्यभिचार चिह्नमिति ॥ तएव विशेषः ॥
तयोर्वा विशेषः तेन शालते शोभत इति सौष्ठवौदार्यविशेषशालिनी ॥ नाछिन्त्येपिनि प्रत्ययः ॥ विनि

सर्ग १

क्रियतां औ विशेषः प्रमाणं ति
किं पीता औदि निवृत्तमागत चि
चकारः उपलब्धता वा प्रत्ययः ॥

प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षो मे याचते ॥ क्रियास्विति ॥ हे नृप क्रियासु कृत्यवस्तुषु युक्ते नियुक्तै रनु
जीविभिः भृत्यैः श्चाराद्भिरित्यर्थः ॥ चरंतीति चरास्त एव चाराः चरैः पचाद्यजंतात् प्रज्ञादित्वात् रणू प्रत्य प
ये यः ॥ चारा एव चक्षुर्यस्य तेन चारचक्षुषा ॥ गावः पश्यंति गंधेन वेदैः पश्यंति वाडवाः ॥ चारैः पश्यंति राजा
नो चक्षुर्भ्यामितरे जनाः ॥ स्वपरमंडलकार्याकार्यावलोकने चाराः चक्षुंषि क्षितिपतिनामिति नीतिवाक्यामृते ॥ नीति ५

क्रियासु युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोनुजीविभिः ॥
अतोर्हसि क्षंतुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वंचनीयाः न प्रतारणीयाः ॥ सत्यमेव वक्तव्यमित्यर्थः चाराप
वारे चक्षुर पचारव इत्यांपदे पदे निपातनइति भावः ॥ अतो प्रयत्नयत्वात् साधु अप्रियं साधु प्रियं वा
मदुक्तं इति शेषः क्षंतुं सोढुं अर्हसि ॥ कुतः हितं पथ्यं मनोहारी प्रियं च वचो दुर्लभं ॥ अतो मद्वचोपि हितत्वा
दप्रियमपि क्षंतव्यमित्यर्थः ॥ ४ ॥ नहि तूष्णीभाव एव वरमित्याशंक्याह ॥ सइति ॥ यः सखा अधिपं स्वा
मिनं साधु हितं न शास्ति नोपदिशति ॥ ब्रुवीते शासिसादिना गौणदुहादि पाठा[द्]द्विकर्मकत्वं ॥ छ ॥

से१

ष्टा॥ ना सनि ४

सहितानुपदेष्टा कुत्सितः सखा किंसखा दुर्मंत्रीत्यर्थः॥ किमाक्षेपे इति समासांतप्रतिषेधः॥ तथा यः प्रभुः
निम्नहानुग्रहसमर्थः स्वामी हितात् हितजनात् आख्यातोपयोग इत्यापादानत्वं पंचमी॥ हितेन संशृणुते न शृणो
श्लो॰ ३ ति॥ समो गम्यछीस्यादिना संपूर्वात् इतेरकर्मकात् आत्मनेपदं॥ अकर्मकत्वं चैवंविवक्षिकं॥ सहितमश्रोता किंप्रभुः कु
त्सितस्वामि॥ पूर्ववत्समासः॥ सर्वथा सचिवेन वक्तव्यं स्वामिना श्रोतव्यं एवं राजमंत्रिणोरेकमत्यं स्यादिति भा इत्यर्थः॥४
वः॥ एकमत्यस्य फलमाह॥ सदेति॥ हि यस्मात् नृपेषु स्वामिषु अमात्येषु सहभवा अमात्यास्तेषु च अव्ययात्त्यप्॥ अ
स्या सयः॥

सकिंसखासाधु न शास्ति योधिपं हितान्न यः संशृणुते स किंप्रभुः॥
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः॥५॥ छू॥

नुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते॥ अतो मया वक्तव्यं त्वया श्रोतव्यं इति भा ननु जातु न हाती
वः॥ अत्रैव राजमंत्रिणो हितानुपदेष्टृश्रवणनिंदादसामर्थ्यसिद्धेकमत्यलक्षणस्मरणस्यनिर्दिष्टं रै २ स्य त्यर्थः॥
सर्वसंपत्सिद्धिरूपेण कार्येण समर्थनात्॥ कार्येण कारण रूपोर्थांतरन्यासोलंकारः॥ तदुक्तं सामा
न्यविशेषकार्य कारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थांतरन्यास इति॥ ५॥ संप्रति साहंकारं परिह
रति॥ शिवराम
॥५॥

निसर्गेति॥ निसर्गेण दुर्बोध्यं स्वभावदुर्ग्रहं॥ दुष्दुरि स्यादिना खल् प्रत्ययः॥ भूपतीनां चरितं चेष्टितं कुत्स्नबोध
विक्लवाः अस्तैनापहताः जंतवो मादृशाः पामरजना इत्यर्थः॥ कुतो भयमेकत्र संघट्टत इत्यर्थः तथापि निगूढत
त्वं संवृतपाथा तं च विद्विषां नयवर्त्म षाड्गुण्यप्रयोगो मया पाश्ववेदितान्न मिति यावत्॥ संधिविग्रहयानानि सं
श्रयासनमेव च॥ द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवर्ण्यने॥१॥ संधिर्मैत्रीकरणं॥ विग्रहः परपीडनं॥ यानं पर
प्रतिगमनं॥ परस्परदेहार्पणं संस्था॥ आ सनं उपेक्षणं॥ एकेन सह संधाय परं प्रतियाने द्वैधीभावः॥ विदं क

॥निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जंतवः॥
तवानुभावोयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषां॥६॥

र्मपिलुङ्॥ अयं इदं वेदनइत्यर्थः॥ विद्धेयप्राध्यान्यासु लिंगनिर्देशः॥ तवानुभावः सामर्थ्यं॥ अनुगतो भावो
अनुभाव इति घञंतेन प्रादिसमासः॥ ननूपसर्गात् घञ् प्रत्ययेः॥ श्रीणी भुवोनुपसर्गे योऽस्त्यनुपसर्गात्॥
भवतेर्धातोर्घञ्विधानात् अत एव काशिकायां कथं प्रभवो राज्ञां प्रकृष्टो भाव इति प्रादिसमासः॥ इति दोषप
रिहारो॥ सम्यक् ज्ञात्वैव विज्ञापयामीति॥ ननु कर्णकठोरं प्र[illegible]लापया मित्यत आह॥ अत्र विपाल्लंकारः॥ ६॥ ७॥ ८
वृथा

व्यं वा

संप्रतिनियहृत्कैतदेहृ॥ विशंकमान इति॥ सुखेन युध्यत इति सुयोधनः॥ भाषायांशास्त्रियुधिद्धृषिमृषि
भ्योपुलम्‌ त्ययः॥ नृपासनस्थः सिंहासनस्थोपि वनमधिवसतीति वनाधिवासिनः॥ वनस्थात्राज्यभ्र
ष्टादपीत्यर्थः॥ भवतः त्वत्तः पराभवं पराजयं विशंकमानः उत्प्रेक्षमाणः सन् दुष्टमुदरं अस्येति दुरोदरं द्यू
तं॥ एषोदरादित्वात्साधुः दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमित्यमरः॥ उदरं जठरे प्राणमध्यप्रांतके दे
५ कपटेन शानइतिहलायुधः॥ तस्य छद्मना मिषेण जितां लब्धां दुर्नयार्जितामित्यर्थः॥ जगतीं महीं जगती वि

विशंकमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः॥
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः॥७॥

श्वपेमस्यां वास्तुछंदोविशेषयोरिति वैजयंती॥ नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते न तु दास्यत इत्य
२ च र्थः॥ बलवत्स्वामिकमविशुद्धागमं धनं भुंजानस्य कुतो मनसः समाधिरिति भावः॥ अत्र दुरोदरछद्मजि
तामिति विशेषणानुद्धरणपदार्थस्य चतुर्थपदार्थं प्रतिहेतुत्वेनोपन्यासात् द्वितीयकाव्यलिंगमलं
कारः॥ तदुक्तं हेतोर्वाक्यपदार्थत्वे काव्यमुदाहृतमिति॥७॥ नयेन जेतुं जगतीं समीहत इत्युक्तेऽलंकारमाह॥ त१वा
न तथापीति॥ साशंकोपि जिम्हो वक्रोऽथवं चक इति पावलसदुयोधनो भवज्जिगीषया गुणैर्भवंतमाक्रमितुं

लिंग२

गुणलो१ त्व१ मुं२ व२ सज्जनसंसर्गालाभे३ हात्मभिः समं विरोधोपि व३

इच्छतेत्यर्थः॥ हेतावितितृतीया॥ गुणसंपदादयादाक्षिण्यादिगुणगरिम्णाकरणेनशुभ्रं यशः तनोति विस्तार
यति॥ सखलोभनीयां संपदमात्मसात्कर्तुमपि गुणैरात्मानः प्रकटयतीत्यर्थः॥ ननु खु गुणिनः सतो
पि सज्जन विरोधो महान्स्तस्य दोषइत्याशंक्य सोपि नतसंसर्गालाभेनीचसंगमान्नमरं स्कर्षावहत्वादि मुं मा३
शयेना त्याह॥ समिति॥ तथाहि भूतिं समुन्नयन्नुत्कर्षमुत्पादयन्॥ अतः अन्न ज्ञानार्विस्यादिना ज्ञात्प्रत्ययः॥ चा
पुनर्जिह्मग्रहणसामर्थ्यात्प्रयमासंमानाधिकारेणापि॥ महात्मभिः समं सहेत्यर्थः॥ साकं सार्द्धं समं सह

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः॥
समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोपि समं महात्मभिः॥८॥

१विरोधो मरः॥ अनार्यसंगमात् दुर्जनसंगमात्यंचमीविभक्तिरितिपंचमी॥ वरं अनाकप्रियं दैवादनेवरश्रेष्ठत्रिषुक्ली
पि बेअनाकप्रियमित्यमरः॥ अत्रमेत्रपेक्षयामनाक्प्रियत्वं विरोधस्य॥ भूतिं समुन्नयन्निस्यस्य पूर्ववाक्या
स्य न्वपेसमो मस्यवाक्यार्थपुनरादानात्समाप्तपुनरात्ख्यानदोषापत्तिः॥ तदुक्तं काव्यप्रकाशे॥ समाप्तपुनादाना
रा त्समाप्तपुनरुक्तमिति॥ नचवाक्यान्तरमेतत्त्वेनोक्तेदोषपरिहारः स्याद्दर्थान्तरन्यासोलंकारः॥ सच भूति
समुन्नयस्येयपदार्थविशेषणद्वाराविरोधपरता॥ प्रतिहेतुत्वाभिधारूपं काव्यलिंगानुप्राणितइति॥८॥
न्ने क

कि॰ स॰ हेरंब ॥६८॥

शौर्यं व्यापद्वेष्टितं १ प्रपत्तुमिच्छुना॥

ननु कातर्यं केवला नीतिरिति स्यात् तां अन्यनीतियुक्तं पौरुषमस्य स्यादाह॥ कृतारीति॥ षण्णां वर्गः षड्वर्गः अरीणां अंतः
शत्रूणां कामक्रोधादीनां षड्वर्गोरिषड्वर्गः शिवभागवत्समासः तस्य जयः कृतो येन तेन तथोक्तेन विनितेन नृप्य
र्थः॥ विनिताधिकारं प्रजापालनमिति भावः॥ अगम्यरूपां दुरालंबनीयां॥ मनोरिमां मानवीं मनूपदिष्टां सं
माचारक्षुण्णामित्यर्थः॥ पदवीं प्रजापालनपद्धतिं॥ प्रपित्सुनां प्रप धत्ते सनं ताडु प्रत्ययः॥ सनीमिमेत्यादिना
पूर्वोदेत्ता॥ अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः॥ आलंतं द्विरालस्यं यस्य तेनालस्यतंद्रिणा अनालस्येनेत्यर्थः॥

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना॥ विभज्य नक्तंदि
वमस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं॥ ९ ॥ श्री चंद्रलापरमेश्वर्यै नमः॥

तंद्रिः सौत्रो धातुः तस्मात् [illegible] अदपश्चेत्यो [illegible] णादिक इकारप्रत्ययः॥ कृदिकारादक्तिनो वा ङीपु वक्तव्यः॥ ब
हिर्घटी नि तंद्रिः तंद्री तापीति क्षीरस्वामी॥ निद्रा तंद्रा स्यादवंतोपीति क्षीरस्वामि॥ तथा रामायणे प्रयोगः॥ सानि
तंद्रिरमसाश्च स्वदोषपरदोषवित् इति॥ तेन तु यो यं धनेन पौरुषस्य कर्म पौरुषं पुरुषपुरुषाकार उद्योग इ
ति यावत्॥ युवादित्वात् अण् प्रत्ययः॥ पौरुषं पुरुषस्योक्तं भावकर्म णितेजसीति विश्वः॥ नक्तं च दिवा च नक्तं
दिवं अहोरात्रयोरित्यर्थः॥ अचतुरेत्यादिना सप्तम्यर्थवृत्त्योर्व्ययोर्द्वंद्वनिपातनसमासांतः॥ विभज्य जस्यावे ति
ति क्री॰ वं २ नः

स॰ग॰श॰॥वि ॥६॥

संप्रति प्रजास्वप्यनुरागमाह ॥ सखीनिवेति ॥ गतस्मयो निरहंकारः अत एव सदुर्योधनः संततं निरंतरं साधु
सम्यक् अकपटमित्यर्थः । अनुजीविनो भृत्यान् प्रीतियुजः स्निग्धान् सखीन् मित्राणीव दर्शयते
लोकस्येति शेषः । हेतुमति णिच् । णिचश्चेत्यात्मनेपदं । शोभनं हृदयं येषां तान् सुहृदो मित्राणि वा सुहृद्
दुर्हृदौ मित्रामित्रयोरिति निपातः । बंधुभिर्ज्ञातिभिः समानमानान् तुल्यसत्कारान् दर्शयते । बंधू
नां समूहो बंधुता तां ग्रामजनबंधुसहायेभ्यस्तल् । कृतं आधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्श

॥ सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बंधुभिः ॥

यते । वधून् अधिपतीनिव दर्शयतीत्यर्थः ॥ यथा भृत्यादिषु सख्यादि(बुद)बुद्धिर्जायते लोकस्य तथा तान् संभा
त वयतीत्यर्थः अनुजीव्यादीनां कर्तुरीप्सिततमं कर्मेति कर्मत्वं पूर्वं अस्मिन्नेव पदान्वये वाक्यार्थमित्थं व
र्णयंति । सराजा अनुजीव्यादीन् सख्यादीनिव दर्शयते सख्यादयस्तु तेनं पश्यंति सख्यादिभावेन पश्य
तस्तान् तथा दर्शयते स्वयमेव छंदानुवृत्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः ॥ आर्था त्तस्येप्सितकर्मत्वं अ
णिकर्तुरनुजीव्यादेरभिवादिदृशोरात्मनेपदमुपसंख्यानमिति पाक्षिकं कर्मत्वमेव चात्राण्यंतकर्तुः क
र्मणो राज्ञो रण्यंते कर्तृत्वे प्यारोह्यते हस्ती स्वयमेवेत्यादिवद् भूयमाण कर्मेति रलाणावान्नायरोरणा वि

कि॰टी॰स॰
हेरंब
॥८॥

गं॰प॰१

तिसूत्रस्य विषय इति मत्वा णिचश्चेत्येवात्मनेपदं प्रतिपेदिरे। भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्यास्तं
यथाह परस्य तिभृत्या राजानं दर्शयते। भृत्यानू राजा दृश्यन्ते। स्वेः राजा अत्र आत्मनेपदं सिद्धं भवती
ति। अत्राह कैयटः॥ ननु कर्मान्तरसद्भावादत्र णिचात्मनेपदेन न भाव्यं। उच्यते। अस्मादेवोदाहरणाद्भा

ससंततंदर्शयतेगतस्मयः कृताधिपत्यामिवसाधुबंधुतां॥१०॥

ष्यकारस्यायमेवाभिप्रायः। उच्यते। अपर्यन्तावस्थायां एककर्तृकर्मणि तद्व्यतिरिक्तकर्मान्तरसद्भावादात्मने
पदं भवति। यथारोहयन्ति मन्दुष्या निति हूह लण्यन्तावस्थायां कर्तृणां भृत्यानां कर्मत्वमिति न भ
वत्येवात्मनेपदमिति। अत्रोत्प्रेक्षा [illegible] प्रधानोपमालंकारः॥१०॥ ❀॥श्रीचंद्रलांबायेनमः॥ ❀

॥८॥

न चायं त्रिवर्गीत्तप्रमाद्यतीत्याह॥ असक्तमिति॥ यथायथं यथास्वं स्वमनतिक्रम्य यथायथं असंकीर्णरूपं विभज्य वि
विच्येत्यर्थः। यथास्वे तु यथायथमिति निपातनात्साधुः। द्विर्भावो नपुंसकत्वं च ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं
पक्षे पातः पक्षपातः आसक्तिविशेषः। समस्तुल्यो पक्षपातो यस्यास्तया भक्त्या अनुरागविशेषेण पूज्येषु अनु
रागो भक्तिरित्युपदेशः। पूज्यश्चायं त्रिवर्गासक्तमनासक्तमव्यसनितयेति यावत्। आराधयतः सेव्यमानस्य अस्य दुर्यो
धनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणः त्रिवर्गः। त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः॥

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया॥
गुणानुरागादिव सख्यमीयिवान बाधतेस्य त्रिगणः परस्परं॥५७॥

गुणानुरागात् नदीय गुणेष्वनुरागात् गुणवदात्मप्रयत्नोपादित्यर्थः। सख्यं मैत्री। सख्युः यः इति यप्रत्ययः। ईयिवा
नुपगतवान्। निवेस्यैक्षाउपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तो निपातः॥ नात्रोपसर्गस्तन्त्रं इति का
न शिकाकार आह॥ परस्परं बाधते। अन्योन्यं न पीडयति स्म। समप्रवृत्तित्वादस्य धर्मार्थकामाः परस्परानुपमर्दे
न संवर्द्धन्त इत्यर्थः। उक्तं च धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स नरो जघन्य इति॥५७॥ श्रीरामचंद्रप्रसन्न।

क

अथ श्लोकत्रयेणोपायकौशलं दर्शयन्नादौ साम दाने दर्शयति ॥ निरत्ययमिति ॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधं
साम सामयिकमित्यर्थः । अन्यथा जनानां दुर्ग्रहत्वादिति भावः । साम सान्त्वं । साम प्रेमपरं वाक्यं दानं चार्थविसर्ज
नं भेदः परजनाकृष्टिर्निग्रहः परपीडनमिति । सामसान्त्वमुभे समे इत्यमरः । दानवर्जितं न प्रवर्तते । अन्यथा लुब्धा
धावर्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः । उक्तं चा लुब्धमर्थेन गृह्णीयात् स्तब्धमंजलिकर्मणा । मूर्खं
छंदानुरोधेन तत्त्वार्थेन च पंडितः ॥ १ ॥ तथा भूरि प्रभूतं न तु कदाचित् स्वल्पमित्यर्थः । दानं धनत्यागः । सदित्या

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियां ॥ प्रवर्त्त
ते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥

दरार्थेऽव्ययं । अदरानादरयोः सदसती इति निपातसंज्ञास्मरणात् । तस्य क्रिया तां सत्क्रियां विरहय्य विहायाल्य
पि लघुपूर्वादित्ययादेशः । न प्रवर्त्तते । अनादरे दानवैफल्यादिति भावः । न चैवं सर्वत्रयेनाविवेकित्वं कोऽनु
दानिश्चयस्यात्तदाह । विशेषशालिनी विशेषेषु विशेषणावा शालते शोभते सा । अतिशाययोगे शालिनी
सत्क्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्त्तते । एवं च विनेत्यादिना तृतीया गुणो वा दरोपरि
दानं चेति नोक्तदोषावकाश इत्यर्थः । अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यंकारः । नडु

कं· काव्यप्रकाशे । स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परं । विशेषणतया यत्र वस्तु सैकावलिर्द्विधेति ॥ यथोदाहरणं । न तज्जलं यन्न सुचारुपंकजं न पंकजं तद्यदलीनषट्पदं । न षट्पदोऽसौ कलगुंजितो न यो न गुंजितं तन्न जहार यन्मनः ॥ १२ ॥

अथ दंडप्रकारमेवाह ॥ वसूनीति ॥ वशी स दुर्योधनः वसूनि धनानि वांछन् लोभादित्यर्थः ॥ निहंतीति शेषः ।
न तथा मन्युना कोपेन च । मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः । धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति स्मरणादि
त्यर्थः । किंतु निवृत्तकारणः निवृत्तलोभादिनिवृत्तः सन् स्वधर्म इति एषः स्वधर्मः स्वस्य राज्ञः सतो ममायं
धर्मो ममेदं कर्तव्यमित्यस्माद्धेतोरित्यर्थः । उक्तं च । अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन् । अ
यशो महदाप्नोति नरकं चाधिगच्छतीति स्मरणादिति भावः ॥ गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन । धर्मशास्त्र

वसूनि वांछन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ॥ गुरू
पदिष्टेन रिपौ सुतेऽपि वा निहंति दंडेन स धर्मविप्लवं ॥१३॥ छ ॥

पुरस्कृत्य प्राड्विवाकमते स्थितः समाहितमतिः पश्येद्व्यवहाराननुक्रमादिति नारदस्मरणात् । दंडेन दमेन
नि शिक्षयेत्यर्थः । रिपोः सुतेऽपि वा स्थितमिति शेषः । एतेनास्य समदर्शित्वमुक्तं । धर्मविप्लवं धर्मव्यतिक्रमं ज
र्धर्ममिति यावत् । निहंति निवारयति । दुष्ट एवास्य राज्ञः शत्रुः शिष्ट एवास्य बंधुः न तु स्वबंधिनः पक्षपातोऽस्ती
त्यर्थः ॥ ॥१३॥ ॥ श्रीरामजयराम जयजयराम ॥ श्रीगोपालकृष्णाय नमः ॥ श्रीचंद्रलापरमेश्वर्यै
नमः ॥ श्रीव्यंकटेशाय नमः । श्रीगुरुचरणारविंदाभ्यां नमः ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

संप्रति भेदकौशलमाह॥ विधायेति। शंकाः स्वसंजाताशंकितः साशंको विश्वस्तः सुपरितः सर्वत्र स्वपरमंडले परे स
तरान् परेभ्यः इतरे परेतरान् आत्मीयान् अवंचकानिति यावत् प्रह्वापरान् इतरयेति भेदेन आत्मसात्कुर्वतीति निप
रेतरास्तान् मत्करोतीति एवं तात्कर्मण्यण्प्रत्ययः रक्षंतीति रक्षास्तान् रक्षकान् मंत्रगुप्तिसमर्थानित्यर्थः
नं दिग्गहीत्यादिना पचाद्यच् विधाय नियुज्येत्यर्थः अशंकितस्य आकारं उपैति स्वयमविश्वस्तोऽपि विश्व
स्तवदेव व्यवहरन् परमुखेनैव परान् भिनत्तीत्यर्थः न च तान् रक्षाननुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह

विधाय रक्षान्परितः परेतरानशंकिताकारमुपैति शंकितः॥
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदंति संपदः॥१४॥

व
क्रियेति क्रियापवर्गेषु कर्मसमाप्तिषु अनुजीविसात्कृताः भृत्याधीनाः कृताः अपुनरावृत्तियादत्ता इत्यर्थः
देयत्राचेति साति प्रत्ययः संपदोऽस्य राज्ञः कृतज्ञतामुपकारज्ञत्वं वदंति प्रीतिदानैरेवास्य कृतज्ञत्वं प्रका न१
श्यते न तु वाङ्मात्रेणेत्यर्थः कृतज्ञे राजनि अनुजीविनोऽनुरज्यंते अनुरक्ताश्च न रक्षंतीति भावः १४
न१

अथोपायप्रयोगस्य फलवत्तां दर्शयति अनारतमिति तेन राज्ञा पदेषु उपादेयवस्तुषु पदं व्यवसितत्रा
णस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः सम्यक् असंकीर्णं अव्यस्तं च विभज्य विनियोग एव सत्क्रियाः अनु
ग्रहसत्कारा नू इति यावत् तान् लंभिताः प्रापिताः स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः उपायाः सामाद

अनारतं तेन पदेषु लंभिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलंत्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥१५॥

प यः संघर्षं स्पर्धामुपेत्येव खलु स्वेच्छापरिबृंहितायतीः प्रवृत्तोत्तरकालाः स्थिरा इत्यर्थः अर्थसं
पदो नारतं अजस्रं फलंति प्रसवंत इत्यर्थः १५ श्रीचंद्रलौबायेनमः श्रीरामरामरामरामरामरा
॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥
रामरामरामराराभरामरामराम रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम

अर्थसंपदमेवाह अनेकेति अयुग्मच्छदस्य सप्तपर्णप्रसूनस्य गंध इव गंधो यस्य सः अयुग्मच्छदगंधिः
सप्तम्युपमानेत्यादिना बहुव्रीहिरुत्तरपदलोपश्च उपमानाच्चेति समासांत इकारः नृपाणां उपायनानि उपाह
॥१०। रभूता ये दंतिनः तेषां मदः उपायनमुपग्राह्यमुपहारस्तथोपदे इत्यमरः राज्ञामपत्यानि पुमांसो राजन्याः
क्षत्रियाः राजश्वशुराद्यत् इति यत्प्रत्ययः राज्ञोऽपत्ये जातिग्रहणात् इति साधुः रथाश्चाश्वाश्च रथाश्वं

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरं॥
नयत्ययुग्मच्छदगंधिरार्द्रतां भृशं नृपोपायनदंतिनां मदः॥१६॥

सेनांगत्वादेकवद्भावः अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामंड
पांगणं अंगणं चत्वराजिरे इत्यमरः भृशं आर्द्रतां पंकिलत्वं नयति एतेन महासमृद्धिरस्योक्ता अत ए
वोदात्तालंकारः तथा चालंकारसूत्रं समृद्धिमद्वस्तुवर्णनमुदात्तं इति १६ श्रीरामचंद्रप्रसन्न

॥१०॥

संप्रति जनपदस्य क्षेमकरत्वमाह॥ सुखेनेति॥ चिराय चिरकालं तस्मिन् दुर्योध्यने क्षेमं रक्षणं वितन्वति सति क्षेमकरे स
ति देवः पर्जन्य एव माता येषां ते देवमातृकाः वृष्ट्यम्बुजीविनो देशास्ते न भवन्तीति अदेवमातृका नदीमातृका इत्यर्थः। दे
शो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमं इत्यमरः। एतेन अस्य कुल्या
दिपूर्तप्रवर्तकत्वं उक्तं॥ कुरूणां निवासाः कुरवो जनपदविशेषाः। कृष्टेन पच्यं तदिति कृष्टपच्याः। राजसूयेत्यादि
ना कर्मकर्तरि यत्प्रत्ययान्तो निपातः। तद्विपरीता अकृष्टपच्याः इव कृषिरेषामस्तीति कृषीवलैः कर्षकैः। रजः कृष्या

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः॥ वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति॥ १७॥

दिना वलच् प्रत्ययः। वले इति दीर्घः। सुखेनाक्लेशेन लभ्याः लब्धुं शक्याः सस्यसंपदो दधतो धारयन्तो॥ नाभ्य
स्तात् छतुरिति नुमागमप्रतिषेधः। चकासति शोभन्ते सर्वोत्कर्षेण वर्तन्त इत्यर्थः। अदभ्यस्तात् इति झेरदादेशः। जक्षित्याद
यः षट् इत्यभ्यस्तसंज्ञा। संपन्नजनपदत्वात् संपत्युपकारकत्वाच्चेदं साध्योपमिति भावः॥ यद्वा संपन्नजनपद
न त्वात् संतापकरत्वाच्चेति भावः॥ १७॥ ॥श्रीचंद्रलापरमेश्वर्यै नमः॥ ॥श्रीगुरुभ्यो नमः॥ ॥ ७॥

न

ननेवं जनपदानुवर्त्तिनस्तस्य कथमर्थलाभ इत्यत आह। उदारकीर्तेरिति॥ उदारकीर्त्तिर्महायशाः। उद्योदात्तम
टि हतोरुत्सव स्मरः। दयावतः परदुःखप्रहरणेच्छोरत एव प्रशांतबाधं शमितोपद्रवं क्रियाविशेषणं वा॥ द्यान प्रशांते स्यादिनाश्र
भिधा तोपर्यंतानि शांतो निपातः। अभिरक्षया सर्वतस्त्राणेन उदयं वृद्धिं दिशतः संपादयतः वसूपमानस्य कुबेरो
पमानस्य। वसुर्मयूखाग्नि धनाधिपेष्विति वैजयंती॥ अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिः उपस्नुता

उदारकीर्तेरुदयं दयावतः प्रशांतबाधं दिशतोभिरक्षया॥ स्वयं प्रदुग्धेऽस्य
गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी॥ १८॥ श्री॥ श्री॥ श्रीराम॥

द्राविता मेदिनी वसूनि धनानि। वसु रत्ने हिरण्ये च वसु तोये धने मणाविति वैजयंती॥ स्वयं प्रदुग्धे अक्लेशेन दुग्ध
न दुग्ध इत्यर्थः। दुहेः कर्मकर्तरि लिट्॥ न दुह स्नु नमां यक् चिणाविति यक् प्रतिषेधः॥ यथा केनचिद् दुर्गेन वर्द्धितोर
ति क्षिता गौः स्वयं प्रदुग्धे तद्वदिति भावः। अलंकारस्तु विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिति टि
सर्वस्यालंकारः॥ अत्र प्रतीयमानयागवा सह प्रस्तुतया मेदिन्या भेदे भेदलक्षणातिशयोक्ति वशाद्दोह
त्वेनोक्तिरिति संक्षेपः॥ ॥१८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

संपन्निवीरचेष्टानुकूल्यमाह॥महौजस इति॥महौजसो महाबलाः॥अन्यथा दुर्बलानामनुकारित्वादिति भावः॥मा
नः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः॥अन्यथा कदाचिद्बलदर्पाद्द्विषुर्वीरन्निति भावः॥धना
र्चिताः धनैः संस्कृताः पूजिता इति यावत्॥अन्यथा दारिद्र्यादेनं जह्युरिति भावः॥संयति संगरे लब्धकीर्त
यो बहुशः दृष्टसंग्रामा इत्यर्थः॥अन्यथा कदाचिद्विमुखाः स्युरिति भावः॥संहताः मिथः संगताः स्वार्थनि
ष्ठा न भवंतीति न संहताः॥नञर्थस्य नशब्दस्य सुप्सुपेति समासः॥भिन्नवृत्तयो मिथो विरोधात् स्वामिकार्यवि

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः॥न संह
तास्तस्य न भिन्नवृत्तयः प्रियाणि वांछंत्यसुभिः समीहितुं॥१९॥ ॥

रुद्धक्रिया न भवंतीति न भिन्नवृत्तयः॥पूर्ववत्समासः॥अन्यथा स्वामिकार्यहानिः स्यादित्युभयत्रापि तात्पर्यं॥धनुर्भृतो
धानुष्काः॥आयुधमात्रोपलक्षणमेतत्॥प्राधान्याद्धनुर्ग्रहणं तस्य तु योधनस्य असुभिः प्राणैः प्रियाणि स
मीहितुं कर्तुं वांछंति॥आनृण्यार्थं प्राणानपि दातुमिच्छंतीत्यर्थः॥अन्यथा दोषस्मरणादिति भावः॥अत्र महौ
जस्त्वादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिंगमलंकारः॥तल्लक्षणं
तूक्तं तथा साभिप्रायविशेषणत्वात्परिकरालंकारः॥इति द्वयोस्तिलतंडुलवन्नैरपेक्ष्येण स्फुरणात्संसृष्टिः॥१९॥

स्वराष्ट्रवत्परराष्ट्रवृत्तांतमपि वेत्तीत्याह ॥ महीभृतामिति ॥ अशेषितक्रियः समापितकृत्यः आफलोदयकर्मेत्यर्थः ॥
स दुर्योधनः सच्चरितैः शुद्धचरितैः अवंचकैरित्यर्थः ॥ चरंतीति चरैः प्रणिधिभिर्गूढपुरुषैः पंचाध्यक्षाणां म
हीभृतां क्रियाः प्रारंभान् निःशेषं वेद वेत्ति ॥ विदो लटो वेति णलादेशः ॥ स्वरहस्यं तु न कश्चिद्वेत्तीत्याह ॥ ॥

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ॥ महोदयैस्तस्य
हितानुबंधिभिः प्रतीयते धातुरिवेहितं फलैः ॥२०॥ श्री श्री श्री श्री श्रीराम ॥

महोदयैरिति ॥ धातुरिव ब्रह्मण इव देवस्येव वा तस्य दुर्योधनस्येहितं तु चेष्टा महोदयैर्महावृद्धिभिः हितमनुबध्नं
ति अनुरूपयंतीति हितानुबंधिभिः स्वंनैरित्यर्थः ॥ फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते ॥ फलानुमेयाः तस्य
प्रारंभा इत्यर्थः ॥ २० ॥ श्रीरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरा

संप्रति अस्य मित्रबलमाह ॥ नेति ॥ तेन राज्ञा क्वचित्कुत्रापि सहज्यया मौर्व्या सज्येज्यया सह वर्तमानं सज्यं ॥ मौर्वी ज्या
सिंजिनी गुणः स्यादित्यमरः ॥ तेन सहेति तुल्ययोगे इति बहुव्रीहिः ॥ धनुर्नोद्यतं नोर्ध्वीकृतं ॥ आननं वा कोपविजि
ह्मं कोपकुटिलं न कृतं ॥ यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः ॥ कथं तर्हि आज्ञां कारयति
रासहस्त्राह । गुणेति ॥ गुणेषु दयादाक्षिण्यादिषु अनुरागेण माल्यपक्षे सूत्रानुषंगेण इत्यर्थः ॥ यद्वासौ
५स रथ्यगुणलोभेन नराधिपैरस्य दुर्मौ धनेस्य शासनं आज्ञा मालेव माल्यमिव ॥ माला माल्यं स्रोमनस्यं कं

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननं ॥ गुणानु
रागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनं ॥ २१ ॥ श्री ॥

ते गुणा मौर्वीरणे इत्यमरः ॥ तद्वदित्यर्थः ॥ चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् इति क्षीरस्वामी ॥ शिरोभिरु
ह्यते धार्यते ॥ वचिस्वपियजादीनां किति ॥ इति यकि संप्रसारणं ॥ उपमा स्पष्टैव ॥ ॥ २१ ॥ ॥
॥ श्रीराम राम
॥ श्रीकृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण

।।९३।। संप्रतिऽस्य धार्मिकत्वमाह ।। स इति ।। इद्धशासनः अप्रतिहताज्ञ इत्यर्थः ।। स दुर्योधनेन नवयौवनेनोद्धतं प्र
गल्भं धुरंधरमित्यर्थः ।। दुःखेन शास्यत इति दुःशासनस्तं । भाषायां तु ज्ञा युधिष्ठिरस्यादिना खलत्वर्थे
युक्तस्येत्यर्थः ।। यौवराज्ये युवराजकर्मणि ब्राह्मणादित्वात् ष्यञ् ।। निधाय नियुज्येत्यर्थः ।। पुरोधसा पुरोहि

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।। मखेष्व
खिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसं ।।२२।। श्री ।। राम ।।

तेनानुमतोऽनुज्ञातस्तस्मिन् याजके सतीत्यर्थः ।। तदुल्लंघने दोषस्मरणादिति भावः ।। नेष्टेति भूतार्थे क्तः ।
नतु मतिबुद्धिस्यादिना वर्तमानार्थे अन्यथा पुरोधसेत्यत्र क्तस्य वर्तमाने इति षष्ठी स्यात् ।। अखिन्नो अनल
सो हव्येन हविषा आज्यादिहुतद्रव्येणेत्यर्थः ।। मखेषु क्रतुषु हिरण्यं रेतो यस्य तमग्निं धिनोति प्रीणय चर
ति ।। धिनः प्रीणनार्थत्वात् हि न्वि कृणोरुच्चेत्यु प्रत्ययः ।। अकारश्चांतादेशः ।। ।।२२।। ।। ।।

सचेन्मादृशाद्व्योगीनर्हितैस्ताभिर्निरूप्योगेभर्व्यमिसात्रांक्यद्व्योगा शां दर्शयति ॥ प्रलीनेति ॥ सदुर्योध्यनः प्रली
नभूपालं निःसपत्नमित्यर्थः ॥ स्थिरायति चिरस्थायी त्यर्थः ॥ भुवोमंडलं वारिधिभ्यः आङिति आवारिधि आङ्
मर्यादाभिविध्योरिति अव्ययीभावः ॥ प्रशासत् ॥ आज्ञापयन्नपि जक्षित्यादयः षडिति अभ्यस्तसंज्ञा ॥ नाभ्यस्ताच्छते
रिति नुमागमप्रतिषेधः ॥ त्वत्त एष्यंतीरागमिष्यतीः ॥ ध्यानुनामनेकार्थत्वादुक्तार्थसिद्धिः ॥ अथवा आङ्पूर्वपाठः ॥

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमंडलं भुवः ॥ स चिंतयत्ये
व भियस्त्वदेष्यतीरहो दुरंता बलवद्विरोधिता ॥ ॥२३॥ श्री ॥ छ ॥

एत्येष्यत्यूर्ध्वसद्ध निरुद्धिः ॥ लृट्स्सेद्धुति सप्रत्ययः ॥ उगितश्चेति ङीप् ॥ आच्छीनद्योर्नुमङिति विकल्पान्नुंभावः ॥ भियो भ म१
यहेतून् विपदस्त्यर्थः ॥ चिंतयंति ॥ आलोचयं स्वेवतदाह ॥ तथा हि ॥ अहो बलवद्विरोधिता दुरंता दुष्टावसाना सार्वभौम
स्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसानमेवेत्याश्चर्यं ॥ सामान्येन विशेषसमर्थनरूपोऽर्थांतरन्यासः ॥२३॥

२५

ननु गूढोरंगिनस्य तस्य भयं कथं त्वया निर्द्धारितमित्यत्राह ॥ कथेति ॥ कथाप्रसंगेन गोष्ठीवशेन जनैः सभास्थैः अन्यत्र कथाप्रसंगेन विषवैद्येन ॥ कथाप्रसंगो वार्तायां विषवैद्ये च विवर्तनइति विश्वः ॥ अपवा कथाप्रसंगेषु ईनाम्बेन अनाम्बेस्येकपदं ॥ एकवचनस्यापि कथाप्रसंगशब्दस्य जात्यभिप्रायेण बहुवचनेन संबंध्यजन विशेषणं ॥ उदाहृतादुच्चारिताम्नवाभिधानान्नामधेयात् स्मारकत्वादुतोः ॥ हेतौ विभक्तिपंचमी ॥ आख्याहेअभिधानं च नाम

कथाप्रसंगेनजनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः ॥ तवाभिधानाद्व्यथते नताननः सुदुःसहान्मंत्रपदादिवोरगः ॥ ॥२५॥ श्रीरामप्रसन्न ॥

धेयं च नाम चेत्यमरः ॥ अनुस्मृताखंडलसूनुविक्रमः स्मृतार्जुनपराक्रमः सन्सुदुःसहाद्दत्तिदुःसहान्मंत्रपदान्मंत्रशब्दात्स्मारकात् आखंडलसूनुरिंद्रनुजउपेंद्रो विष्णुरितियावत् ॥ सूनुः पुत्रेऽनुजेपिति विश्वः ॥ तस्य वीपक्षीगरुडः तस्य पराक्रमः पादविक्षेपः ॥ सोऽनुस्मृतोयेन स तथोक्तः ॥ स्मृतगारुडमहिमाउरग इव अत एव नताननः सन्व्यथते दुःखायते पीडा बाधा व्यथा दुःखमित्यमरः ॥ अत्र कर्तृभयद्वेषादिविकाराउर्वीशरइतिभावः ॥ सर्वत्र जयमन्विच्छेन्नुजे

संप्रतिनिगमयति।।तदिति।।तत्तस्मात्मयदर्शितात्त्वयिजिह्मंकपटंकर्तुमुद्यतेत्वांजिघांसावित्यर्थः।।तत्रतस्मिन्नुद्
योगेनविधेयंकर्तव्यंउत्तरंप्रतिक्रियारूपंआशुविधीयतांक्रियतां।।ननुकर्तव्यमपित्वयैवोच्यतामित्याशंक्ये
पेआह।। ।।परेति।। ।।परप्रणीतानिपरोक्तानिवचांसिचिन्वतांसंगृह्णतांमादृशांवार्त्ताहारिणामित्यर्थः।

तदाशुकर्तुंत्वयिजिह्ममुद्यतेविधीयतांतत्रविधेयमुत्तरं।।परप्रणी
तानिवचांसिचिन्वतांप्रवृत्तिसाराःखलुमादृशांगिरः।। ।।२५।।

गिरःप्रवृत्तिसाराःवार्तामात्रसाराःखलु।वार्त्ताप्रवृत्तिर्वृत्तांतइत्यमरः।।वार्त्तामात्रवादिनोवयंनतुकर्तव्यार्थोप
दिष्टासमर्थाइत्यर्थः।।अतस्त्वयैवनिर्धार्यकार्यं।।क्रियानिमित्तविशेषणसमर्थनादर्थांतरन्यासोलंकारः।।
।।२५।।

इतीति। वनसंनिवासिनां पर्णोवनचरादिपेइति गिरं ईरयित्वा उक्ता आत्तसत्क्रिये गृहीतपारितोषिके गते सति तुष्टे
दानमेव वनेचराणां वेतनं ते हि त्तल्लोभात्स्वामिकार्यं कुर्वन्तीति चत्वरं यन्तीति वाक्यामृतेनाऽथ महीभुजा राज्ञा कृष्णासदनं द्रौ
पदीभुवनं प्रविश्य अनुजसंनिधौ न दूने चरोक्तं वचः आचचक्षे। आख्यातं। अथवा कृष्णेति पृथक् छेदः। तदा कृष्णेति प
दं कर्मकं वचः [redacted] सदनं प्रविश्यानुजसंनिधौ तद्वचः कृष्णा आचचक्षे। आख्याता। चक्षिङ्। हृदि हृञ्कृमेक्ष्यादि
प्रधानकर्मणि लिट्॥२६॥ निशम्येति। ततः द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं ऋद्धिरूपां निशम्य आकर्ण्य ततो

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनां॥ प्रविश्य कृष्णासदनं म
हीभुजा तदाचचक्षेनुजसंनिधौ वचः॥२६॥ ॥ श्री॥ श्री। ।श्री॥ ॥

निशम्य सिद्धिं द्विषतामपाकृती स्ततस्ततस्त्या विनियन्तुमक्षमा॥ नृपस्य मन्यु
व्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः॥२७॥ ॥श्री॥ श्री॥ ॥

द्विषद्भ्यो आगतास्ततस्ततस्त्याः। अव्ययात्यबिति त्यप्। अपाकृतीः निकारान् अपकारान् विनियन्तुं निरोद्धुं हृदये निरोद्धुं
नेषः। अक्षमा असती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्द्धिनीः॥ गिरो वाक्यानि उ
दाजहार जगाद॥ ॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आत्मनः समयंगमयन्निसती त्याह ॥ भवादृशेष्विति ॥ भवादृशाः भवद्विधाः पंडिताइत्यर्थः । तेषु विषये । त्यदादिषि
त्यादिना कञ् ॥ आ सर्वनाम्नइत्याकारादेशः । प्रमदाजनोदितं स्त्रीजनोक्तं वदेत्कः । वचित्सर्वप्रियजादीनां संप्र
सारणं । अनुशासनं नियोगवचनं अधिक्षेपइव तिरस्कार इव भवत्यतोनयुक्तं वक्तुमित्यर्थः ॥ तथापिवक्तु
मनुचितेपि निरस्तनारीसमयाः त्याजितनारीलिंगताः रूपस्त्रीसमाचाराः समयाःशपथाचाराकालसि
द्धांतसंविदइत्यमरः । दुराधयः समयोल्लंघनहेतुत्वाद्दुष्टा मनोव्यथाः । पुंस्याधिर्मानसीव्यथेत्यमरः ॥ मां

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेपइवानुशासनं ॥ तथापिव
क्तुं व्यवसाययंतिमां निरस्तनारीसमयादुराधयः ॥ २८ ॥ अखंड
माखंडलतुल्यधामभिश्चिरंधृताभूपतिभिः स्ववंशजैः ॥ त्वया
स्वहस्तेन मही मदच्युता मतंगजेनस्रगिवापवर्जिता ॥ २९ ॥

वक्तुं व्यवसाययंति प्रेरयंति । नकिंचिदयुक्तं दुःखिनामिति भावः ॥ २८ ॥ अखंडमिति ॥ आखंडलतुल्यधामभिः इंद्रतु
ल्यप्रभावैः स्ववंशजैः भूपतिभिः भरतादिभिः चिरं अखंडं अविच्छिन्नं धृता मही त्वया मदश्च्योतती तिमद
च्युत् । क्विप् । तेन मदस्राविणा मतंगजेन स्रगिव आत्मसहस्तेन स्वकरेण स्वचापलेनेत्यर्थः ॥ अपवर्जिता परि
हृता स्वदोषादेवायमनर्थागम इत्यर्थः ॥ ॥ २९ ॥

स्वदोषादेवायमनर्थागमः स्यात् । न त्वं स च दोषः कुटिलेषु कौटिल्यमेवेत्याह ॥ व्रजंतीति ॥ मूढधियः निर्विवेकबुद्धयस्ते पराभ-
वं व्रजंति । ये मायाविषु मायावत्सु विषये ॥ अस्मायेत्यादिना विनिः प्रत्ययः । मायिनो मायावंतः ब्रीह्यादित्वादिनिप्रत्ययः ॥ न
भवंति । अत्रैवार्थांतरन्यासेन समर्थयति ॥ प्रविश्येति ॥ शठाः अपकारिणो धूर्त्तास्तथाविधान् कुटिलान् असंवृतांगान् अवर्मि-
तशरीरान् निशितास्तीक्ष्णाः इषव इव प्रविश्य प्रवेशं कृत्वा घ्नंति हि ॥ आर्जवं हि कुटिलेषु न नीतिरिति भावः ॥३०॥ ॥ ॥

व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः ॥ प्रवि-
श्य हि घ्नंति शठास्तथाविधानसंवृतांगान्निशिता इवेषवः ॥३०॥
गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधि-
पः ॥ परस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियं ॥३१॥

न च लक्ष्मीचांचल्यादयमनर्थागमः किं तु स्वोपेक्षादोषमूलत्वादित्याशयेनाह ॥ गुणेति ॥ अनुरक्तसाधनोऽनुकूलसहायवान्
उक्तं च कामंदके । उद्योगादनिवृत्तस्य सुसहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥ कुलाभिमानी क्ष-
त्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः । अन्यारादित्यादिना पंचमी ॥ क इव को वा नराधिपः गुणैः संध्या-
दिभिः अन्यत्र सौंदर्यादिभिश्चानुरक्तां अनुकूलां कुलजां कुलक्रमादागतां कुलीनां च मनोरमां श्रियं आत्मवधूं
स्वभार्यामिव । वधूर्जाया वधूस्नुषेत्यमरः ॥ परैः शत्रुभिः अपहारयेत् स्वयमेव अपहारं कारयेदित्यर्थः । कले

अथ द्वाभ्यां श्लोकैः कोपोद्दीपनं करोति। भवन्तमिति। हे नरदेव नरेन्द्र नरदेववत्राणम् अभ्युपगमादुपहासवचनं ... तिकाव्य भि
संधिः। एतर्हि इदानीम् अस्मिन् आपत्काले इत्यर्थः। एतर्हि संप्रति इदानीम् अधुना सांप्रतं तथेत्यमरः। इदमो र्हिल्। इदमो र्हि
ल्प्रत्ययः। एतेतौ रथोः। इत्येतादेशः। आपदमेवाह। मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्तमानं अ
भिवर्तमानं ... अनुभवन्तमित्यर्थः। भवन्तं उद्दीपितः उद्दीपितः मन्युः क्रोधः शुष्कं नीरसं शुष्कं इति निष्ठा
तकारस्य ककारः। शमी वासो नरुरिति विशेषणसमासः। तं शमीतरुं शमीग्रहणं शीघ्रज्वलनस्वभावात् कृतं। उच्छिखः

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि। कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः
॥३२॥ अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः। अमर्षशून्येन जनस्य जन्तुना न जात
हार्देन न विद्विषादरः ॥३३॥ श्री रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरा

उद्भासितज्वालः। घृणिर्ज्वाले अपि अग्निशिखे इत्यमरः। ज्वलितिविवक्षितत्रिविकथं न ज्वलयति ज्वलयितुम् उचित इत्यर्थः। मिता
रुक्सदनिरस्तः ॥३२॥ न चेत् शत्रुतादवस्थ्यं ... अवन्ध्यकोपस्येति। अवन्ध्यकोपस्य सफलस्यैव आप
दां विहन्तुर्निग्रहानुग्रहसमर्थस्येत्यर्थः। पुंसः इति शेषः। देहिनो जनाः स्वयमेव वश्याः वशंगता भवन्ति। वशंगताः ... प्र
त्ययः। जनस्य पापाकोपिना भवितव्यमित्यर्थः। व्यतिरेकेणानिष्टमाचष्टे। अमर्षशून्येनेति। कोपनजन्तुना। कृत्ययोरौ के
इति कर्तरि षष्ठी ... नाविति तृतीया। हृदयस्य कर्म हार्दं स्नेहः प्रेमा ना प्रियता हार्दं प्रेम स्नेह इत्यमरः। युवादित्वादण् प्रत्ययः। हृदयस्य
हल्लेखयदण्लासेषु इति हृदादेशः। जातहार्देन जातस्नेहेन सता जनस्य आदरो न विद्विषा द्विषता च सता आदरो न भयं न। दरो

स्त्रियां भये श्वभ्रे इत्यमरः। अमर्षशून्यस्य रागद्वेषा
वकिंचित्करत्वादगणनीयावित्यर्थः। एतस्मिन्नेव प्रयो
गे मेघविशान्न द्विधापदच्छेदः पुंवाक्ये पुनर्दोषः। अ
न्तःस्थाने कोपः कार्यस्त्वस्थाने त्याज्य इति भावः ॥३३॥

॥१९७

परिभ्रमन्निति। लोहितचंदनोचितः उचितलोहितचंदनः वाहिताग्न्यादित्वात्साधुः। अभ्यस्तरक्तचंदनइत्यर्थः। अभ्य
स्तेप्युचितंन्याय्यमिति यादवः। महारथो महास्यंदनचारीत्यर्थः। उभयत्रापि प्राग्वत् निपातः। अय्यचुरेणुरूषितोधूलि
धूसरितः। पादाभ्यामंती तिगच्छतीति पदातिः पादचारी। अन्यत्रभ्यांचेत्यनुवर्तमाने पादेवेतोणादिकइण्प्रत्ययः। पाद
स्यपदाज्यातिगोपहतेष्विति पदादेशः। गिरिषुइतिउतं गिरिविभक्त्यर्थेव्ययीभावः। गिरेश्चसेनकस्येतिविक
ल्पात्समासांताभावः। परिभ्रमन्नयंवृकोदरोभीमः सत्यधनंयस्येति सोडुनवचनं। अथवापि सत्यमेवस्थ्य
नेननतुभ्रातरइतिभावः। तवेतिशेषः। मानसं नोदुनोतिक च्चित्। नपरितापयतिकिं। कच्चित्कामप्रवेदनमित्यमरः।

परिभ्रमंल्लोहितचंदनोचितः पदातिरंतर्गिरिरेणुरूषितः॥ महारथः सत्यधनस्यमानसंदुनोतिनोकच्चिदयं
वृकोदरः॥३४॥ विजित्यय : प्राज्यमयच्छदुत्तरान्कुरूनकुप्यंवसुवासवोपमः॥ सवल्कवासांसिनवाधुनाहरन्करोतिम
न्युंनकथंधनंजयः॥३५॥ ॥

साभिप्रायाविष्करणं कामप्रवेदनं। ३४। विजित्ययइति। वासवंउपमायस्यसः वासवोपमः इंद्रतुल्योयोधनंजयः उ
त्तरान्कुरून्मेरोरुत्तरान् अमानुषदेशान् विशेषान् विजित्यप्राज्यंप्रभूतं। प्रभूतंप्रचुरंप्राज्यमित्यमरः। कुप्याद
न्यत्कुप्यंहेमरूप्यात्मकं स्यात्कोशोन्यद्धिरण्यं चेंमरूप्येकृताकृते ताभ्यांयदन्यत्तत्कुप्यं रूप्यंतत्द्वयमाहतमित्यमरः॥
वसुधनंअयच्छत्। दत्तवान्। पाघ्रेत्यादिनादाणोयच्छादेशः। सधनंजयतीतिधनंजयोर्जुनः संज्ञायांभृतॄवृजिधारि
नात्वचप्रत्ययः। अरुर्द्विषदित्यादिमुमागमः। अधुनाअस्मिन्कालेअधुनेतिनिपातात्साधुः। नवल्कवासांसिआहरे
ल्के

ते प्रयच्छताकथं मसंक्लौ यंदुः संज्ञा ॥
नकोनिशापू ॥ क्लौ ॥

वनांतेति॥ वनस्यांतः स्वरूपे। अंतः प्रांते निकेतान्तो स्वरूपे च मनोहर इति विश्वः। वनभूमिरेव तत्रातप्यातपया कठिनीकृताकृती
कठिनीकृतदेहो आकारो देह आकृतिः इति वैजयंती॥ विषक्तं समंततस्तु परितः सर्वतो विष्वगित्यपीत्य
मरः। कचाचितौ कचव्याप्तौ विशीर्णकेशौ ऽस्त्वित्यर्थः। अत एव अगजौ गिरिसंभवौ गजाविव स्थितौ एतौ यमौ युग्म
जातौ माद्रीपुत्रावित्यर्थः। यमौ द्वंद्वे पुत्रे स्वादिसंयम्यमे यमजे पि चेत्यमरः। विलोकयन्नुत्सहसे कथं धृतिसंयमौ कर्म
संतोषनियमौ धृतिर्योगांतरे धैर्ये धारणाध्वर तुष्टिष्विति विश्वः। बाधितुं नोत्सहसे न प्रवर्त्तसे ऽत्र कथं ष्वसादिना
तुमुन्। अर्हते महद्धैर्यमिति भावः॥३५॥ अथ रोलालदर्शनाद्दर्शयितुमुपोद्घातयति। प्रकृतस्यार्थं वर्णयितुमर्थांतरवर्णनमुपोद्घा

वनांततत्रात्याकठिनिकृताकृतौ कचाचितौ विष्वगिवागजौ गजौ। कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नु
त्सहसे न बाधितुं॥३६॥ इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः॥ विचिंतयंत्या भवदाप
दं परां रुजंति चेतः प्रसभं ममाधयः॥ ॥३७॥ श्रीगुरुचरणारविंदाभ्यां नमः॥ श्रीचंद्रलांबाप्रसन्नोस्तु॥

नः॥ इमामिति॥ इमां वर्तमानां तव द्युमांतावकीं त्वदीयां न स्वेदभिस्सणनुवक्ष्मैकावेक वचन इत्यतत्ववकादेशाः। धियं त्वदापद्विषयां चित्त
वृत्तिमहं न वेद्मि कीदृशी वा न वेद्मि परबुद्धेः प्रत्यक्षत्वादिति भावः। विदो लटो वेतिलटो णल आदेशः। न चो समदृष्टांतेनापन्नत्वात् दुरवि
त्वमनुमापयितुं शक्यते धीरादिषु वैकांतिकत्वादित्याशयेनाह॥ विचित्रेति॥ चित्तवृत्तयो विचित्ररूपाः धीराधीरा ह्यनेक
प्रकाराः खलु॥ किंतु परां उत्कृष्टां भवदापदं विचिंतयंत्याः अनुभवंत्याः मम चेतः चित्तं आधयो मनोव्यथाः। उपसर्गे घोः
किरिति किप्रत्ययः। प्रसभं प्रसह्य रुजंति भंजंति। रुजो भंग इति धातोर्लट्॥ परस्य तामपि दुःसह दुःख जननी त्वद्विपत्तिरनु
भवितारं त्वां कथं न विकरोतीति महच्चित्रमित्यर्थः। चेतरुजिरुजार्थानां भाववचनानामज्वरेरिति षष्ठी न भवति तत्र विशेषा
धिकारान्ने शेषत्वस्यैवेवक्षितत्वादिति॥३७॥

९८ तदापदमेव श्लोकद्वयेनाह॥ पुरेति॥ यस्त्वं महाधनं महार्घमोल्यं श्रेष्ठमित्यर्थः। महाधनं महामोल्यमिति विश्वः॥ शयनं शय्यामधि-
रूढः सन् स्तुतयो गीतयश्च ता एव मंगलानि तैः करणभूतैः पुरा विबोध्यसे वैतालिकैरिति शेषः। पूर्वं बोधितः इत्यर्थः। पुरि लुङ्-
चास्मे इति भूतार्थे लट्॥ स त्वं अदभ्रदर्भां बहुकुशां। स्त्री कुशं कुथो दर्भः अदभ्रं बहुलं बहु इत्यमरः॥ स्थलीं अकृत्रिमभूमिं॥
जनपदेत्यादिना कृत्रिमा चेत् ङीप्॥ एतेन दुःसहस्पर्शत्वमुक्तं॥ अधिशीङ्स्थासां कर्मेति कर्मत्वं। अधिशय्यानुपित्वा। आप्र-
क्लितिदूत्यपठन्देशः। अशिवैः अमंगलैः शिवारुतैः क्रोष्टृवाशितैः। शिवाहरीतकीक्रोष्टीशमीनद्यामलक्युमेति वैजयन्ती।
निद्रां जहासि त्यजसीति शेषः॥ ३८॥ पुरेति॥ हे नृप यदेतत् पुरोवर्त्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसा

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमंगलैः॥ अदभ्रदर्भामधिशय्य
स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥ ३८॥ पुरोपनीतं नृप रामणीयकं द्विजातिशेषे-
ण यदेतदन्धसा॥ तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः॥ ३९॥

अन्नेन॥ भिस्सा स्त्री भक्तमन्धोन्नमोदनोऽस्त्रीत्यमरः॥ द्विर्जाती येषां ते द्विजातयः॥ तदुक्तं॥ जन्मना जायते शूद्रः संस्काराद् द्विज
उच्यते इति॥ द्विजस्याद्ब्राह्मणः क्षत्रवैश्यदंताण्डजेषु चेत्यमरः॥ रमणीयस्य भावः रामणीयकं मनोहरत्वमुपनीतं प्रापितं॥
नयतेर्द्विकर्मकत्वादप्रधाने कर्मणि क्तः॥ प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात्॥ अद्य वन्यफला-
शिनः सतो वनवृत्तेः पुरः यशसा समं परम् अतिमात्रं कार्श्यं परैति प्राप्नोति॥ उभयमपि क्षीयत इत्यर्थः॥ अत्र सहोक्तिरि-
त्यलंकारः॥ तदुक्तं काव्यप्रकाशे सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकमिति॥ ॥ ३९॥ श्री सांब प्रसन्न॥

अनारतमिति ॥ अनारतं अनवरतं मणिपीठशायिनौ मणिमयपादपीठशायिनौ यौ चरणौ राजशिरः स्रजां रजः कर्तृ नम्रनृपालमौलिस्रजां रजः परागो रंजयन् ॥ रंजयति स्म । तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिराल्लूनशिखेषु छिन्नाग्रेषु बर्हिषां कुशानां ॥ बर्हिः कुशः कुतुनाशयोरिति विश्वः ॥ वनेषु निषीदतस्तिष्ठतः ॥ ४० ॥ ननु सर्वप्राणिसाधारण्यामापदि कोपरिवेदनेत्यत आह ॥ द्विषन्निति ॥ यद्यस्मात्कारणादियं दशावस्था ॥ दशावर्त्तावतस्था यां चेति विश्वः ॥ द्विषंतो निमित्तं यस्याः सा द्विषन्निमित्ता इति नृतत्प्रत्ययः ॥ ततो मेमनः समूलं सावशेषं उन्मूलयतीवोत्पाटयतीव ॥ दैविकी स्वापन्न दुःखायेत्यत आह ॥ परैरिति ॥ परैः शत्रुभिः अपर्यासिता अपर्यावर्त्तिता वीर्यसंपद्येषां तेषां मानिनां पराभवोपि विपत् पि उत्सवएव भवति एव ति
अनारतं यौ मणिपीठशायिनावरंजयद्राजशिरस्स्रजां रजः ॥ निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषां ॥ ४० ॥ द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ॥ परैरपर्यासितवीर्यसंपदां पराभवोप्युत्सव एव मानिनां ॥ ४१ ॥ विहाय शांतिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषां ॥ व्रजंति शत्रूनवधूय निस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥
वेधर्मेणार्थांतरन्यासः ॥ मानहानिर्दुःसहन तापदिति भावः ॥ ४१ ॥ विहायेति ॥ हे नृप शांतिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः संधेहि अंगीकुर्वित्यर्थः ॥ अस्मान् प्रसीद ॥ प्रार्थनायां लोट् ॥ शमेन कार्यसिद्धो किं क्रोधेनेत्याशंक्याह ॥ व्रजंतीति ॥ निस्पृहाः मुनयः शत्रूनवधूय अनिर्जित्य शमेन क्रोधवर्जेन सिद्धिं व्रजंति भूभृतस्तु न ॥ केवलस्य कार्यवत्राजकार्यं न शांतिसाध्यमित्यर्थः ॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१९

पुरःसरा इति॥ किं च धामवतां तेजस्विनां परनिकारासहिष्णूनामित्यर्थः॥ पुरः सरंतीति पुरःसराः अग्रेसराः पुरोग्रतोग्रेषु सर्तेरि-
सु ति टप्रत्ययः॥ यशोधनाः भवत्सदृशाः दुःसहं अतिदुःसहं ईदृशं उक्तप्रकारं निकारं अपकारं प्राप्य रतिं संतोषं अधिकुर्वते स्वी-
कुर्वते चेत् हंत इति खेदे मनस्विता अभिमानिता निराश्रया आश्रयात् निर्गता निराश्रया सती हता गता तेजस्विजनैकशरण-
त्वान्मनस्वितायाः इत्यर्थः॥ अतः पराक्रमितव्यमिति भावः॥ अधिकुर्वते इत्यत्र यद्यपि अप्रसहनात् सगतेरधिपूर्वात्करो-
तेः अधेः प्रसहने इत्यात्मनेपदं न भवति॥ प्रसहनं परिभव इति काशिका॥ तथाप्यस्याः कर्त्रभिप्रायविवक्षायामेव प्रयो-

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशं॥ भवादृशाश्चेदधिकुर्वते रतिं निराश्रया
हंत हता मनस्विता॥४३॥ अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनं॥ विहाय ल-
क्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकं॥४४॥ श्रीमातापितृभ्यां नमः॥ श्रीगजाननः॥

कर्त्रभिप्राये स्वरितञितः इति आत्मनेपदं सिद्धं॥४३॥ अथेति॥ अथ पक्षांतरे निरस्तविक्रमः उज्झितविक्रमः सन्
चिराय चिरकालेनापि क्षमां शांतिमेव॥ क्षितिक्षांत्योः क्षमेत्यमरः॥ सुखस्य साधनं कारणं पर्येषि अवगच्छसि॥ जाना-
सि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय धरतीति धरः पचाद्यच्॥ जटानां धरः जटाधरः सन्निह वने पाव-
कं जुहुधि प्रीणय॥ पावके होमं कुर्वित्यर्थः॥ अधिकरणे पावके कर्मत्वोपचारः॥ विरक्तस्य किं धनुषेत्यर्थः॥ हु-
झल्भ्यो हेर्धिः॥४४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१९

अथ समयोल्लंघनाद्बिभेषि चेत् तत्रापि न किंचिद्दोषमित्याह॥ नेति॥ परेषु शत्रुषु निकृतिर्भ्रंश्यो परं न येषां तेषु तथोक्तेषु अपका
रनिरतेषु सत्सु भूरिधाम्नो महौजसः॥ प्रतीकारसमर्थस्येत्यर्थः॥ ते तव समयस्य शपथोदरावसरान्वनेवस्याभिलेव
रूपासंवित्॥ समयाः शपथाचारकालसिद्धांतसंविद इत्यमरः॥ तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तं॥ युक्ते च क्ष

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः॥ अरिषु हि वि
जयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि॥ ४५॥ ॥

मं सक्तं हिते त्रिष्वित्यमरः॥ हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीशाः अरिषु विषये सोपधि सकपटं यथा भव
ति तथा॥ कपटोऽस्त्री व्याजदंभोपधयश्छद्मकैतवे इत्यमरः॥ संधिदूषणानि विदधति कुर्वंति॥ केनचिद्व्याजेन
दोषमापाद्य संधिं दूषयंतीति विघटयंतीत्यर्थः॥ उक्तस्य विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यसमयप
रिरक्षणादिकमनुक्तं स्यादिति भावः॥ अर्थांतरन्यासोलंकारः॥ पुष्पिताग्रावृत्तं॥ ४५॥ ॥ ॥ ॥

उक्तमर्थमाशीर्वादपूर्वकं उपसंहरति ॥ विधीति ॥ विधिर्दैवं ॥ विधिर्विधाने दैवे चेत्यमरः ॥ समयः कालस्तयोर्नियोगात् नियमनाद्धेतोः ।
तयोर्दुरतिक्रमत्वादिति भावः । अगाधे दुस्तरे आपत्पयोधौ आपदेव पयोधिस्तस्मिन् समासः । दिनकृतमिवेति वक्ष्यमाणानुसारात्
॥ अस्मिन्नापत्पयोधौ मग्नं । सूर्यो हि सायं सागरे दुस्तरे निमज्जति परेद्युरुन्मज्जतीत्यागमः । दीप्तिः प्रतापः आतपश्च
तस्याः संहारेण संक्षेपेण जिह्मं अप्रसन्नं । शिथिलवसुं शिथिलधनं अन्यत्र शिथिलरश्मिं । वसूर्द्देग्नौ रश्मौ च वसु तो
येथ्यने मणाविति वैजयंती ॥ शिथिलबलमिति पाठे उभयत्रापि शिथिलत्वचालिकमित्य...ः । रिपुस्तिमिरमिव तं रिपु
तिमिरं उदस्य उत्क्षिप्य निरस्येत्यर्थः । उदीयमानं उद्यन्तं मीङ् गताविति धातोर्दैवादिकात् कर्तरि शानच् त्वां दिनादौ दि
नकृतमिव लक्ष्मीः भूयः समभ्येतु भजतु । आशिषि लिङ्लोटौ इति लोट् । चमत्कारित्वात् मंगलाचरणरूपत्वात् सर्गान्त्यश्लो
केषु लक्ष्मीशब्दप्रयोगः । यथाहि भगवान् भाष्यकारः । मंगलादीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथन्ते वीरपु

॥ ॥ विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलवसुमगाधे मग्नमापत्पयोधौ ॥ रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥ इति श्री किरातार्जुनीये महाकाव्ये भारवीकृतौ लक्ष्म्यंके प्रथमः सर्गः ॥

रुषाणि आयुष्मत्पुरुषाणि च भवंति ॥ अध्येतारश्च प्रवक्तारो भवंतीति पुष्पोपमेयं मालिनीवृत्तं ॥ सर्गान्तत्वाद्वृत्तभेदो
यथाह दंडी ॥ सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः ॥ सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरंजनमिति ॥ अथ कविः ॥
काव्यवर्णनमाख्यानपूर्वकं सर्गपरिसमाप्तिं च कथयति ॥ इतिशब्दः परिसमाप्तौ । भारविकृतावितिकविनामकथनं
महाकाव्यमिति महच्छब्देन लक्षणसंपत्तिः सूचिता ॥ किरातार्जुनावधिकृत्य कृतो ग्रंथः किरातार्जुनीयः ॥ श्रीशुभं दयमसम
नी

अग्रेति विवस्वान् सूर्यः अग्रे अस्तशैलशिखरे ये सानवः तेषु ये भूरुहाः वृक्षास्तान् नितांतं पिशंगैः अत्यंतारुणैः मृदुभिः करैरिव करैः अंशुहस्तैरिव आश्लिष्टरूपकं बलिहस्तांशवः करा इत्यमरः यद्वा करैः मृदुभिः श्लथमवलंब्य अस्त इति शैलोः अस्तस्तु चरमः क्ष्माभृदित्यमरः तस्य गहनं काननं नु जलधिं नु महीं नु आविवेश तपनस्य पतने संदेह एव दृष्टः पतनं तु रुक्वास्य तन्न ज्ञायते श्रीघ्रगमनादित्यर्थः अत्र तपने पतनस्य आरोप्यमाणस्य गहनाद्यनेकविषयत्वेन संदेहः संदेहालंकारः उत्प्रेक्षेति केचित् ७ आकुल इति चलानां कुलायेभ्यः कुलायान्

अग्रसानुषु नितांतपिशंगैर्भूरुहान् मृदुकरैरवलंब्य अस्तशैलगहनं नु विवस्वाना ।। विवेश जलधिं नु महीं नु ७ आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः आययावहरिदश्वविपांडुस्तुल्यतां दिनमुखेन दिनांतः ८ श्रीमूषकवाहनायनमोनमः श्रीवसांबनसम

प्रतिसचलतां पतत्रिकुलानां पक्षिसमूहानां आरावैः आकुलः अनुदित शब्देना भावमात्रं उषः शब्देन संध्यामात्रं च विवक्ष्यते उषसि भवः औषसः संधिवेलेत्यादिना योगविभागाद् अणुप्रत्ययः अन्यथा कालाह अणुप्रत्ययः तथा चानुदितौषसराग इत्यविद्यमानं संध्यारागइत्यर्थः एकत्रापगमादन्यत्रानुदयाच्चेति भावः अहरिदश्वः अविद्यमानसूर्यः एकत्रानुदयादन्यत्रास्तमयाद्धितिभावः अत एव विपांडुः तिमिरानुदयाच्चेति शेषः दिनांतः सायंकालः दिनमुखेन प्रातःकालेन तुल्यतां आययौ तद्वद्बभूवेत्यर्थः अत एवोपमालंकारः ८

किरात
टीका
२८

सर्गसटी ९

आस्थितेति स्थगितवारिदपंक्त्यापिहितमेघवृंदयासंध्ययाआस्थितः आक्रांतः गगनपश्चिमभागः सोर्मिः उर्मिसंक्रांतेत्यर्थः तथाविद्रुमवितानविभासाप्रवालप्रकरकांत्यारंजितस्यस्वसावर्ण्यमापादितस्यजलधेः श्रियमूहे संध्यायारक्तवर्णत्वादितिभावः वहतेः कर्तरिलिट् तत्सदृशीश्रियमुवाहेत्यर्थः अतएवनिदर्शनालंकारः ९ प्रांजलाविति प्रबद्धः अंजलिर्येनतस्मिन्प्रांजलौ प्रबद्धांजलौ प्रादिभ्योधातुजस्यबहुव्रीहौवाच्योत्तरपदलोपश्च नतमूर्ध्नि नमस्कुर्वाणे तत्प्रवणतत्रसंध्यायामेवप्रवणं आहितंचेतो येनसतस्मिन्नेवंविधेपि

आस्थितस्थगितवारिदपंक्त्यासंध्ययागगनपश्चिमभागः सोर्मिविद्रुमवितानविभासारंजितस्यजलधेःश्रियमूहे ९ प्रांजलावपिजनेनतमूर्ध्निप्रेमतत्प्रवणचेतसिहित्वा संध्ययानुविदधेविरमंत्याचापलेनसुजनेतरमैत्री १०

निवर्तमानया जने विषयेप्रेमहित्वाविहायविरमंत्याचिरंतमानेया आयाउपरिभ्योरमइतिपरस्मैपदं संध्ययाचापलेनास्थैर्येण युवादित्वादण्प्रत्ययः सुजनादितरोदुर्जनः तस्यमैत्रीसख्यंअनुविदधेअनुचक्रे कर्मणिलिट् यथादु

सेवकं र्जनस्यमैत्रीस्तेहंतमपिजहातितद्वत्संध्यापिस्नेहंमानंजनमहासीदित्यर्थः मित्रस्यकर्ममैत्री अणंतात्ङीप् अत्रसंध्यादुर्जनमैत्र्योश्चापलासमानधर्मः अनुविधानमतएवार्थरूपेणेयमुपमा १० श्रीरामचंद्रश्रीरामायरामभद्रायरामचंद्रायवेधसे रघुनाथायनाथायसीतायाःपतयेनमोनमः श्रीगजाननप्रसन्न

राम
२८

औषसेति औषसादुषःकालभवादातपाद्भयं तस्मादित्युत्प्रेक्षा लीनं क्वचिद्गूढं वासरच्छविरातपस्य विरामाद्ध्वं
नोः पटीयः प्रभविष्णुतरं संधं करोतीत्यंधकारं ध्वांतं अंधकारोऽस्त्रियां ध्वांतं तमिस्रं तिमिरं तमः इत्यमरः अथ
न संध्यापगमादनंतरं शनकैः मंदं निम्नात्सन्निपत्यागत्य समानि समस्थलानि उदवाप व्यानशे अत्र प्रस्तुतांध
कारविशेषणसाम्यादप्रस्तुतचोरार्थप्रतीतेः समासोक्तिरलंकारः उत्प्रेक्षात्वं गतस्यात् ११ एकतामिति
ले एकतां अभेदं गतस्येव तमः सर्वत्रव्याप्त्याप्रतीतेरित्युत्प्रेक्षा महतः शैलादेरपि कस्यचित्केस्यापि पदार्थस्य वि

औषसातपभयादपलीनं वासरच्छविविरामपटीयः सन्निपत्य शनकैरिव निम्नादंध
कारमुदवाप समानि ११ एकतामिव गतस्य विवेकः कस्यचिन्न महतोऽप्युपलेभे भास्व
ता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः १२ श्रीरामचंद्राभ्यां नमो नमः

वेको भेदो नोपलेभे न गृहीतः जनैरिति शेषः अत एवोत्प्रेक्षा पतितेनास्तमितेन भास्वता सूर्येण भुवनानां भुवन
स्थपदार्थानामित्यर्थः विशेषाः पर्वतादिभेदाः आत्मनि स्वस्मिन्नेव निदधिरे इव निहिताः कथमन्यथा नो
पलंभ इत्यर्थः अत्रोत्प्रेक्षयोः सजातीययोः सापेक्षत्वादंगांगिभावेन संकरः १२ श्रीगुरुभ्यो नमो नमः
श्रीनारायणगुरुचरणारविंदाभ्यां नमो नमः श्रीमूषकवाहनाय नमो नमः श्रीसांबसदाशिवाय नमः

ऋच्छतामिति वधूभिः स्वकामिनीभिः सह अभेदं अवियोगं ऋच्छतां तथा संकल्पवतामित्यर्थः यामिनीषु विरहो येषां ते नैषां नियतवियोगानां रहयतेरावश्यकार्थो णिनि नियतं निशायामिति तेषां विहगानां चक्रवाकानामित्यर्थः मिथुनानि वियोगं आपुरेव न तु न आपुरित्ययोगव्यवच्छेदः तथाहि कालनियोगो दैवाज्ञा न लंघ्यते खलु दुर्वार इत्यर्थः १३
गच्छतीति शकुंतौ चक्रवाकपक्षिणि सामान्यस्य प्राकरणिकविशेषपर्यवसानात् शकुंतिपक्षि शकुनि शकुंत शकुनद्विजा इत्यमरः अंतिकगते समीपस्थेपि दयितायै चक्रवाक्यै प्रतिमुखं अभिमुखं यथा तथा वाचं यच्छति

ऋच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानां आपुरेव मिथुनानि वियोगं लंघ्यते
न खलु कालनियोगः १३ गच्छति प्रतिमुखं दयितायै वाचमंतिकगतेपि शकुंतो नीयते
स्म नतिमुज्झितहर्षं पंकजं मुखमिवांबुरुहिण्या १४ श्रीरामायनमः श्रीमनमोनमः गजान

वाचमेव ददाति आह्वानं कुर्वति सतीत्यर्थः न संगच्छमाने सतीत्यर्थः पाद्रेत्यादिना लाग्रीयच्छादेशः अंबुरुहिण्या नलिन्या उज्झितहर्षं चक्रवाकदुर्दर्शनाद् सूर्यनादित्वस्त्व विकासं पंकजं मुखमिव नतिं नीयते स्म नीतं प्रधानकर्म ण्याख्येये इत्यादिना द्विकर्मकदुहिनियतेर्द्विकर्मकत्वात् प्रधाने कर्मणि लिट् प्रायशः दुःखदर्शनात् स्त्रियः खिद्यते अत्र पंकजावनतेश्चक्रवाकविक्रोशनानंतर्यात् हेतुकसमुत्प्रेक्षा न च मुखोपमेयं अंबुरुहिण्याः कामिनीनां सा म्यंगमयत्यानिरूप्यते इति उपमोत्प्रेक्षयोः अंगांगीभावेन संकरः व्यंजकवाध्यप्रयोगात् ह्यानीयमानोत्प्रेक्षा १४

रंजितानुति । तिमिरेणविविधास्तरवःशैलाश्चरंजिताः स्वसावर्ण्यमापादितानु अन्यथाकथमेषांनीलादिगुण
मितिभावः गगनंनामितंनु आभूतलादितिशेषः मितांहस्वदूरस्तवान्नादिष्टानु प्रवृत्याकेषांचिद्दिक्स्यान्तहस
त्वं यहास्थगितंनुछन्नंनु उभयत्रापितमसोघनत्वान्नदृश्यमतरत्यर्थः उभयत्रापितमसावृतत्वान्नदृश्यतेति न
भावः तयाधरित्रीविषमेषुनिम्नोन्नतेषुपूरितासमीकृतानु अन्यथातद्विवेकः कथंनस्यादितिभावः ककुभो
दिशश्चसंहृतानुलुप्ताः किं अन्यथाकथंनदृश्यंतइतिभावः अत्रतिमिरस्यतरुशैलाद्यनेकविषयरंजकत्वा

रंजितानुविविधास्तरुशैलानामितंनुगगनंस्थगितंनु पूरितानुविषमेषुधरित्री
संहृतानुककुभस्तिमिरेण १५ रात्रिरागमलिनानिविकासंपंकजानिरहयंतिवि
हाय स्पष्टतारकमियायनभःश्रीर्वस्तुमिच्छतिनिरापदिसर्वः १६ श्रीरामचं

दि कमारोप्यसंदिग्धवृत्तिसंदेहालंकारः अन्येतुनुशब्दस्यसंभावनाद्योतकत्वं अत्रोत्प्रेक्षाप्रकारमित्यलंकारसर्वस्व
कारः १५ रात्रिरागेति श्रीःशोभारात्रेः संध्यायाः रागेणस्वच्छायोपरंजनेनमलिनानिअतएवविकासरहयंतित्य
जंति रहयतेस्त्यागार्थेशात्प्रत्ययः पंकजानिविहायस्पष्टतारकंनभः आकाशमियाय तथाहि सर्वःनिरापदिनि
र्बाधस्थलेवस्तुस्थातुमिच्छति एकान्वयपदेनैनुदृष्टान्तादितीह्प्रतिषेधः श्रेयसांतेषुवसिःप्रसारिणीतिवचनादि
त्यति १६ श्रीसांबसदाशिवायनमोनमः श्रीसरस्वत्यैनमोनमः श्रीरामचंद्रप्रसन्न श्रीगजाननप्रसंनोस्तु

व्यानत्राद्रति व्राद्राध्येरेण विमुक्तः क्षिप्तः केतकीसुकुसुमकेसरवत्पांडुः भिन्नाप्रापिताकांतिर्यस्य सरभिसमूहः चूर्णस्यक
पूरक्षोदस्य मुष्टिरिव मुष्टिप्रापूरस्यद्विलिंगत्वेऽत्र पुल्लिंगतेव ग्राह्या उपमेयानुसाराद्भासवस्यदिग्रां व्यानत्रो विव्याप अ
त्रदिग्रानिशाकरयोर्नायिकोपम्यं गम्यते १७ उत्सृतीति इंद्रस्येयं ऐंद्री दिक् प्राचीनारकनाभेन क्षत्रनाथे कनीनिकायां
नक्षत्रे तारकं नारका पिचेति वैजयंती अंतिकं व्रजति सति आप्युतमिस्त्रामंध नमसं तमिस्रास्त्री ध्वांतनिशिनिरयं
धतमसेपिच इतिवैजयंती शुचमिव विरहदुःखमिवेत्यर्थः उत्ससर्ज विजहाति प्रसादो नैर्मल्यमेव गुणः सएव मंजन
यस्य तत्त्तमसो [illegible] हासइवतेन विद्राद्मुखमिव मुखं अग्रभागं श्लिष्टोपमेयं उहवहन्तिस्म अत्र दिक् चंद्रयोर्नायिका

व्यानत्रोबुध्राध्वरेण विमुक्तः केतकीकुसुमकेसरपांडुः चूर्णमुष्टिरिव लंभितकांतिर्वासवस्य दिशामंशुसमूहः
उत्ससर्ज तमिस्रामंतिकं व्रजति तारकराजे दिक्प्रसादगुणमंडनमुहस्रश्मिहासविद्राद्मुखमैंद्री १८
नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः खेरराज निपतत्करजालं वारिधेः पयसि गांगमिवांभः १९
द्यानिरुंधदतिनीलघनाभं ध्वांतमुद्यतकरेण पुरस्तात् क्षिप्यमाणमसितेतरभासा शंभुनेव करिचर्म चकासे २०

नायिकोपम्यं गम्यते १८ नीलनीरजेति शैलरुद्धवपुषः उदयगिरितिरोहितमंडलस्य शीतरश्मेरिंदोः संबंधिनी नीलनी
रजनिभे वनिपतत् हिमवद्गौरं शुभ्रं करजालं वारिधेः पयसि निपतत् गांगं अंभइव रराज उपमानेपि विशेषणयोज्यं १९
द्यामिति द्यां निरुंधद्दाकाशमावृण्वत् अतिनीलघनाभं उद्यताः कराः अंशवः हस्ताश्च येन असिताभ्यो इतराः शुभ्राः
भासा यस्य तेन चंद्रेण पुरस्तात् प्राच्यां अग्रे च क्षिप्यमाणं नुद्यमानं ध्वांतं शंभुना क्षिप्यमाणं गजचर्मेव चकासे उप
मानेपि विशेषणानि योज्यानि २० श्रीनारायणगुरुचरणारविंदाभ्यां नमोनमः श्रीरामचंद्रगुरवे नमोनमः

अंतिकांतिकेति अंतिकांतिके अतिसमीपे प्रकारेगुणवचनस्येति द्विर्भावः कर्मधारयवद्भावात् लोपालुक् अं
तिकांतिकगतेंदुनाविसृष्टमुक्तेदीधितिजाले जिह्मतांसंकोचं जहत्तित्यजतिसतिनि तिमिरभारैस्तमस्तोमैः नि
रोधात् उपरोधात् नितिस्तेनानिर्गतानादिगंतोपध्वंसनिव प्राणयन्निवरराज उत्प्रेक्षालंकारः २१ लेखयेति दं
डः विमलविद्रुमभासास्वच्छप्रवालसवर्णयालेखयाधकलयासंहतं सांद्रं तिमिरं मोहिवराहः कनकस्य टंकः शिलाभे
दकं धूस्त्रं टंकः पाषाणभेदकइत्यमरः तद्वत्सिंदूरग्ग्यालोहितवर्णया पिंगांगार्च निवंकव्यभित्तिदीपू दंष्ट्रयाभुवः मं १
डलमिवोद्धासेउच्चिक्षिपे अस्यतेः कर्त्तरिलिट् सोपसर्गादस्यतेरात्मनेपदं विकल्पात् २२ दीपयन्निति अथो

अंतिकांतिकगतेंदुविसृष्टेजिह्मतांजहतिदीधितिजाले निस्तनस्तिमिरभारनिरोधादुध्वंसन्निवरराजदिगंतः २१ ले
खयाविमलविद्रुमभासासंहतंतिमिरमिंदुरुदासे दंष्ट्रयाकनकटंकपिशंग्यामंडलंभुवइवादिवराहः २२ दीपयंन्न
थनभः किरणौघैः कुंकुमारुणपयोधरगौरः हेमकुंभइवपूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः २३ उद्गतेंदु
मविभिन्नतमिस्रां पश्यतिस्मरजनीमवितृप्तः व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडयानववधूमिवलोकः २४

दयानंतरंकरणोघैर्नभोदीपयन्प्रकाशयन्कुंकुमेनारुणोयः पयोधरः कुचः सइवगौरोरुणः उदयरागादितिभावः तुहि
नांशुरिंदुः शनकैः पूर्वपयोधेः पूर्वसागरात् हेमन्तः कुंभः हेमकुंभइवोन्ममज्ज उज्जगामेत्युत्प्रेक्षा २३ उद्गतेंदुरिति
लोकः जनः लोकस्तुभुवनेजनइत्यमरः उद्गतेंदुमुद्यतचंद्रामविभिन्नतमिस्रामनिःशेषध्वांतांरजनीं व्यंशुकं
अपनीतावगुंठनमतएवस्फुटं दृश्यमानं मुखंयस्यास्तांतथापि व्रीडयाओतिजिह्मांअतिवक्रांनववधूंनवो
ढांस्त्रियामिवअवितृप्तः सन्पश्यतिस्म २४ श्रीरामचंद्रगुरुचरणारविंदाभ्यांनमोनमः श्रीनारायणगुरवे

नप्रसादमिति हिमभासा चंद्रेण द्यौराकाशो उचितं योग्यं प्रसादं न गमिता अद्रयो वनानि च तेभ्यः तिमिरं नोध्धृतं नोत्सा
रितं दिङ्मुखेषु दिगंतेषु धाम तेजः न विकीर्णं न प्रसृतं तथापि रजनी भूषितैव किमुतान्यगुणसंपन्नाविति भा
वः अत्र साधनं कारणं भावेपि तत्कार्यं भूषणं तया विभावनालंकारः २५ मानिनीति उदितः शीतमयूखः उष्ण
चिरहत्तेन बाष्पेण रोदनं बाष्पमश्रू चेत्यमरः कलुषानाविलान् मानिनीजनस्य कलहांतरितस्य नायिकाजन
स्य विलोचनपातान् मानजनितरोषालोकनानीति भावः कोपाक्रांतं पराङ्मुखं पश्चात्तापसमन्विता कलहांतरि
ता प्रोक्ता नायिका नयनात्तिभिरिति दशरूपके प्रतिगृह्णन् स्वीकुर्वन् पराङ्मुः अपरिहार्यत्वादिति भावः अन

नप्रसादमुचितं गमिता द्यौर्नोध्धृतं तिमिरमद्रिवनेभ्यः दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी
हिमभासा २५ मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् मंदमंदमुदितः प्रययौ
खं भीतभीत इव शीतमयूखः २५ श्लिष्यतः प्रियवधूरुपकंठं तारकास्ततकरस्य हि हिमांशोः उ
द्गमेन भिरराज समंतादंगराग इव लोहितरागः २७ श्रीरामजयरामजयजयरामरामरामरामरामराम

एवं भीतभीत इति भीतप्रकार इत्युत्प्रेक्षा मंदंमंदं मंदप्रकारं उभयत्रापि प्रकारे गुणवचनस्येति द्विर्भावः कर्मधारयवद्भा
वात्सुपोलोपः खमाकाशं प्रययौ २५ श्लिष्यत इति ततः प्रसारिताः करा इव कराः अंशुहस्ता येन तस्य ततकरस्य ता
रका एव प्रियवधूः रूपकं उपकंठं अंतिके असंतसयोगे द्वितीया विभक्त्यर्थे व्ययीभावः श्लिष्यतः प्रत्यासीदतः आलिं
गतश्च हिमांशोः संबंधि समंतादुद्गमनमनुसर्पनं अर्थांतरत्वात्कर्मकत्वं धातोरर्थांतरवृत्तेरितिवचनात् लोहित
रागो अरुणप्रभा अंगराग इवाभिरराज यथालिंगतः प्रियस्यांगरागः आलिंगनाद्गलिततद्धृदयमर्पतीति भावः आ
लिंगनात्प्रयोगगलतीनिम्रस्थिः अत्र रूपकोपमयोरंगांगीभावेन संकरः २७ श्रीगुरुचरणारविंदाभ्यां नमो नमः

शेरितेति धाराधरेण चंद्रेण शेरितः विसृष्टः करौघः संहतानि मांसूण्यपितमांसि मंदरेण मंदराचलेन भिन्नः नुन्नः क्षी
रसिंधुः अविरलाः सांद्राः उच्चाः उन्नतास्तरवो येषु तानि काननानि दुवनुनोद चिक्षेप २८ शृंगारतामिति शशिपादैः
चंद्ररश्मिभिः पादा रश्म्यंघ्रितुर्यांशा इत्यमरः शृंगारतां शबलतां गमिता नीता शारः शबलपीतयोरिति विश्वः विटो
पिनां तरूणां छायया कल्याणि न्यस्तैः शुकुबलिभिः श्वेतपुष्पाद्युपहारैश्चित्रापितलानि उपरिभागाः यासां ताभिः करो
पहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियामित्यमरः वस निवेश्मानि निवासगृहाणि तेषां महीभिः भूमिभिः तुल्यतां

प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि क्षीरसिंधुरिव मंदरभिन्नः काननान्यविरलो
च्चतरूणि २८ शृंगारतां गमितया शशिपादैश्छायया विटपिनां प्रतिपेदे न्यस्तशुकुबलिचित्रतलाभि
स्तुल्यता वसतिवेश्ममहीभिः २९ आतपेध्वनि मता सह वध्वा यामिनीविरहिणा विहगेन सेहिरे न
किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यं ३०

साम्यं प्रतिपेदे कल्मीलितिः अर्थोऽयमुपमा २९ आतपइति आतपे दुःखकरे प्रीति भावः वध्वा चक्रवाक्या सह भ
न एव वध्वनि मता संतोषवता यामिनीषु चिरविरहिणा नियतविरहिणा अत एव वा विहगेन चक्रवाकेन हिमरश्मेः किरणाः
न सेहिरे दुःखकरे आतपे कथं संतोषः सुखकरे चंद्ररश्मिजाले कथमसंतोषस्तत्राह तथाहि दुःखिते संजातदुः
खे मनसि सर्वं असह्यं मनोहरमपि इति भावः दुःखिते मनसि मनोहरमपि सर्वं दुःखमयं भवतीति भावः स किं स
हाम्बेति यस्त्रस्यय पूर्वं तु आतपाऽतिपदुः तत्र वध्वा सह आतपोऽपि सेहिरे तद्विरहिणा शशिकिरणा अपि
न सेहिरे इति योऽयं फलं तु समानं ३० श्रीरामचंद्र

गंधमिति अपांकणवाहीयोग्यान्वयेव्यवधानमपिसोढव्यं विकसतांकुमुदानांगंधंसौरभ्यंउद्धतंरजःपरागोय
वस्मिन्कर्मणियथाभूतितथोभूषाद्विभाषेतिविकल्पान्नकप् विक्षिपन्नविकिरन्उद्धिशशिरःसुरभिर्यामिनी
मरुत्परिलीनाःगूथिताःविहंगाःयासुताःवनराजीरादुधाव दूषकंपयामास विहंगाश्रयत्वेनाविरोधेनवन
राजयःकिंचित्कंपयामासेत्यर्थः आङीषदर्थेभिव्याप्तावित्यमरः यथाकश्चित्कामिनीगंधोद्भूतदिनासिंच
न्नाकर्षतितद्वदितिभावः ३१ संविधातुमिति यामिनीवनितेवतयारात्रिरूपयाकांतयामन्मथस्यअभिषेकं
त्रिभुवनजेत्रयात्राभिषेकंसंविधातुंसम्यक्कर्तुंअंत्रावोजलानीवतेषामोघःपूरःलसन्यस्मिन्सततचिन्हःस्फु

गंधमुद्धतरजःकणवाही विक्षिपन्विकसतांकुमुदानां आदुधावपरिलीनविहंगायामिनीमरुदपांवनराजीः ३१
संविधातुमभिषेकमुदासेमन्मथस्यलसदंशुजलौघः यामिनीवनितयाततचिह्नःसोत्पलोरजतकुंभइवेंदुः ३२
तेजसापिखलुनूनमनूनंनासहायमुपयातिजयश्रीः यद्विभुःशशिमयूखसखःसन्नाददेविजयिचापमनंगः

टलांछनोरुंदुःसोत्पलोजेरेतकुंभइवोदासेउद्विक्षिप्तेउत्क्षिप्तः अस्यतेःकर्मणिलिट् अत्रसंविधातुमिति
तुमनोप्रतीयमानोत्प्रेक्षयानुप्राणितेयमुत्प्रेक्षयोःसंकरः ३२ तेजसेति तेजसाअनूनंसंपूर्णमप्यसहायं
सहायरहितंपुरुषमितितिशेषः जयश्रीनोपयाति खलुनूनं कुतोयद्यस्माद्विभुःअपिसमर्थोपिअनं
गःशशिमयूखानांसखासहचरस्तथोक्तःससहायाएवनित्यर्थः विजयिविजयशीलं जिद्दृक्षीत्या
दिनाइनिप्रत्ययः चापमाददे विशेषणसामान्यसमर्थनरूपोर्थांतरन्यासः ३३ श्रीरामचंद्रप्रसन्नोभवतु

दूतिव्यापारः ४ कर्मणि ल्लिट् दूतस्य भावकर्मणोः यत्प्रत्ययः तथा

दृष्ट्वा मुद्दीपनमामन्त्रीभुपवर्ण्य संप्रत्तिनकार्यभूतं त न्निवर्णनमारभते सप्तनामित्यादि सन्निकृष्टरन्तिभिः सन्नरन्तो सेवैः अतएव स्मरद्वारैः स्मरवधूभिराहितत्रोभैः प्रागेव विहितकेलिगृहमंडनैरपि पुनः सम्पनां केलिगृहाणां विरचनामंडनमीषे अभिलषितात् इषः कर्मणि लिट् आगतप्रियकथैः प्राग्... प्रियजन स वृत्तांतैरपि दूरं यथा स्यात् तथा अभिलषितं भूषितैरपि भूषणं प्रसाधनमीषे औत्सुक्यातिरेकादितिभावः ३४

सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूरं सन्निकृष्टरति भिः सुरद्वारैर्भूषितैरपि विभूषणमीषे ३४ नस्रजो रुरुचिरे रम
८ णीभ्यश्चंदनानि विरहे मदिरा वा साधनेषु हि रतेरुपधत्ते रम्यतामति
घसमागम एव ३५ रामरामरामरामरामरामरामरामराम

नेति विरहे विरहावस्थायां स्रजो माल्यानि चंदनानि गंधाः मदिरा वा मद्यानि च रमणीभ्यः रुच्यर्थानां प्रि यमाणः इति संप्रदानात् चतुर्थी न रुरुचिरे न रोचंते स्म हि यस्मात् प्रियसमागम एव रतेः साधनेषु स्रगादि षु रम्यतां मनोहरत्वं रुचिरत्वमिति यावत् उपधत्ते करोति आधत्ते तदभावादरुचिर्युक्तैवेत्यर्थः अतएव वैधर्म्यात् कारणेन कार्यसमर्थनरूपोऽर्थांतरन्यासः रमंत एभिरिति रतयः स्यात् ... अणोरदुपधात् इति यत्प्रत्ययः कृ

स्वयुग्चावडूरमितिकाद्रि... कर्मण्यं: ३५

किरात
टिप
३९

प्रस्थिताभिरिति अधिनाथनिवासं प्रियगृहं प्रतिप्रस्थिताभिः प्रचलिताभिर्ध्वंसितानि खंडितानि प्रि
यसखीवचनानि स्वयं प्रस्थानं लाघवायेत्येवं रूपाणि याभिस्ताभिः मानिनीभिः कामनाभिः स्त्रीणामीर्ष्या
कृतः कोपमानो न्यासंगिनि प्रिये इति लक्षणात् अपहस्तितं निरस्तं धैर्यं येन सः तथा सादयन् मानं शरीरं च
कर्षयन् शोषयन् स्वदोषपी[redacted]त्यर्थः मदो बललंबे स्वीकृतः अज्ञानव्याजेन लाघवापनुत्वसौ कृयादि
त्मनो दोषानस्यतीति भावः ३५ कांतेति रतये सुरताय बहु संदिशंतीभिरनेकं वाचिकं कथयंतीभिः स
देशाव्यसनाकृतव्यमप्यजानतीभिरित्यर्थः रमणीभिः कांतवेश्म यातं प्राप्तमेवननु मध्यमागानिवृत्त

प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः मानिनीभिरपहस्तितधैर्यः सादयन्नपि
मदो बललंबे ३५ कांतवेश्म बहु संदिशतीभिर्यातएव रतये रमणीभिः मन्मथेन परिलुप्तमती
नां प्रायशः स्खलितमप्युपकारि ३७ आशु कांतमभिसारितवत्या योषितः पुलकरुद्धकपोलं
निर्जिगाय मुखमिंदुमखंडं खंडपत्रतिलकाकृति कांत्या ३८

मित्यर्थः ज्ञानाभावे कथं प्रियगृहप्रा
भ्रमवतीनां प्तिस्तत्राह तथाहि मन्मथेन परिलुप्तमतीनां स्खलितं विरुद्धाचरणमपि प्रायशो उपकारि ज्ञानाभावेपि प्रि
यवासनावशात् प्रियगृहगमनं अत्यर्थं अभूदिति भावः ३७ आश्विति आशु कांतमभिसारितवत्या
अभिगतवत्या स्वार्थे णिच् योषितः संबंधि पुलकैः रुद्धावावृतौ कपोलौ यस्य तत् खंडाः प्रभ्रष्टाः पत्रा
णां पत्रलेखानां तिलकस्य चाकृतिः सन्निवेशो यस्य तत्तथोक्तं मुखं कांत्या अखंडपूर्णमिंदुं निर्जिगा

य जयति स्मेत्यर्थः इयमुपमा ने
त्रयहृषीति दृष्टिनासादृश्यार्थं ग
णानात् ३८

अथ धुर्ग्मनसखीनायिकासंवादमाह उच्यतामिति तत्र नायिकाह हे सखि त्वया सः धूर्त्तः अशेषमखिलं वच
नीयं वक्तव्यमुच्यतां निःशंकं उपालभ्यतामित्यर्थः ब्रू[illegible]गौ दुहादित्वाद्प्रधाने कर्मणि लोट् अथ सख्याह
हे सखि हे नायिके ईश्वरे भर्त्तरि विषये परुषता पारुष्यं न साध्वी न हिता अथ नायिकाह हे सखि तर्हि एनं अनु
नीय सात्वयित्वा आनय पुनः सख्याह हे नायिके विप्रियाणि जनयन् प्रियाणि कुर्वन्सः कथं वाऽनुनेयः आ
नयनार्हः अनुनयार्हः स्तथेत्यर्थः ३९ किमिति पुनर्नायिकाह हे सखि तर्हि गतेन तत्प्रतिगमनेन नाकं के
र्यइत्यर्थः कुतः उपेतुं गंतुं न युक्तं हि पुनः सख्याह हे नायिके सुभगमात्मानं मन्यते तच्छीले नि सुभगमानिनि सो

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः
किं गतेन न हि युक्तमुपेतुं कः प्रियेसुभगमानिनि मानः योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूढे
युग्मं योषितः पुस्तकराधिदृप्यत्याधर्मवारि नवसंगमजन्म कांतवक्षसि बभूव पतंत्या भूषणं लुलितमंडनतै
व ४१

र्याभिमानिनि आत्मनो नेस्वश्वेति पिनिप्रत्ययः तस्मिन् प्रिये विषये को मानः यद्वा नहीत्यादिना सखीवाक्यं तत्र न
हीत्येकं पदं न युक्तं सा खिद् इत्यर्थः उपेतुं गंतुं न ह्युक्तं किमित्यर्थः कुतः सुभगमानिनि प्रिये कोऽभिमानः नाहकुजन
स्य दुर्लभत्वादिति भावः इत्येवं रूपाः स्त्रियोषितां कथासु विषये समेतैः समीपमागत्य श्रुण्वद्भिरित्यर्थः कामि
भिः बहुरसा बहुत्वादाधृतिः संतोषः दुहे ऊढा अत्र रोमोत्कंप निर्वेदाद्यनेकभावरूपा बहुरस्य परिपूर्ण कांतावर्णना
नुत्तरोत्तरमपूर्वहृदयानंदसंदेहमविंदनइत्यर्थः प्रायेणात्र प्रौढाः कलहांतरिताभ्युन[illegible]का सज्ञेयः ४०

तथा तथा

योषितइति पुलकरोधिरोमांचव्यापिनवसंगमेनजन्मयस्यतत्घर्मवारिस्वेदोदकंदधत्स्याद्गुणिसात्त्विकोक्तिः कांतवक्षसिप
तंत्यादृश्यौत्सुक्योक्तिः योषितोलुलितानिस्फुरतसंमर्दयत्रोत्स्नमृष्टानिमंडनानिस्रक्चंदनादीनियस्यास्तस्याःभावः उरसृष्ट
ध्यानत्वंसैवभूषणंमंडनंबभूव तदेवफललाभत्वेतिभावः ४१ शीधवेति सीधवेतजनेनेतिसीधुःशीधुःपक्वेक्षुरस
विकारोमद्यविशेषः तस्यपानेनविधुरास्फविमूढासुतदृष्टीनेःसंगतास्फकामिनीषुआशुमानंकोपंनिगृह्णन्।नि
य वर्तन्शिथिलीकृतालज्जायेनसामदोनुमदनोनुउपलेभेलक्ष्यतेस्मेत्यर्थः प्रियसमागमसीधुपानरूपोभय

शीधुपानविधुरास्फनिगृह्णनुमानमाशुशिथिलीकृतलज्जः संगतास्फदयितैरुपलेभेका
मिनीषुमदनोनुमदोनु ४२ दूरितिपुरुषिधाणिकपोलोजीवितंत्वयिकुतःकलहस्याः
कामिनामितिवचःपुनरुक्तंप्रीतयेनवनवत्वमियाय ४३

कारणसंभवाल्लज्जामानयोस्त्यागादुभयथामानविग्रहाद्यनुभावसाधारण्याच्चसंदेहःसएवलंकारः ४२ दूरीति
दूरिस्वदागमनमार्गएवचक्षुःइत्यौत्सुक्योक्तिः अधिपाणिपाणौकपोलावितिचिंतोक्तिः किंबहुनाजीवितंत्व
यित्वदधीनंत्वांविनानजीवतीत्यर्थः इतिगाढानुरागोक्तिः अतोस्याःकलहोविग्रहःकुतइत्येवंकामिनांप्रीतये
पुनरुक्तंपुनरुच्यमानंवचोदूतीवाक्यं।नवनवत्वंअपूर्ववद्भावमियाय भकारार्थेद्विर्भावः कर्मधारयवद्भावात्स
पोलुक् कांतानुरागप्रकटनात्कामिनःप्रहृष्यंतीतिभावः कलहांतरितेयं ४३ आदित्सरयसूनवेनमोनमः

राम
३२

साचीति लोचनयुगं साचिनमयंती प्रिये तिर्यक्पातयंती न तु संमुखमित्यर्थः दयितवक्षसि पातं रुंधती दृष्टमपि प्रतिब
ध्नती लज्जा सुभ्रुवो विभूषां शोभां जनयति स्म संगतौ स्मरतप्रसंगे सत्युपरराम च यतस्तस्यास्तदा ऽ दूषणमेवेति
भावः विभूषाकर्मकादिति परस्मैपदं ४४ सव्यलीकमिति सव्यलीकं सापराधं अत एवावधीरितो ऽवज्ञातः सन्खि
न्नख्यतं पूर्वकाले स्वादिनो न तु पुरुषः सपदि कोपस्य पदेन व्याजेन प्रस्थितं निर्गच्छंतं प्राणनाथं योषितः संबंधि अभि
बाष्पनिपातो आभिमुख्येनाश्रुमोक्षः सुहृदिव रुणद्धि स्म रुरोध सापराधेऽपि प्रिये प्रियया अभिनिर्भर्त्सिते गंतुमुद्यु

साचिलोचनयुगं नमयंती रुंधती दयितवक्षसि पातं सुभ्रुवो जनयति स्म विभूषां संगता
वुपरराम च लज्जा ४४ सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन योषितः सु
हृदिव स्म रुणद्धि प्राणनाथमभिबाष्पनिपातः ४५

कृ सति यथा सुहृदं न गंतव्यमिति तं निवारय
ति तथाश्रीरोदनमभूदिति भावः बाष्पपातस्य मन्युमोक्षलिंगतया प्रस्थानप्रतिबंधकत्वात् सौहृदोपम्यं गम्य
ते इयमधीरा खंडिता ज्ञाते ऽन्यासंगिनि पत्यौ खंडिता ईर्ष्याकषायिता अधीरा साश्रुवक्रोक्तिरिति दशरू
रूपके ४५ श्रीरामचंद्रगुरुचरणारविंदाभ्यां नमो नमः श्रीनारायणगुरुचरणारविंदाभ्यां स
हस्रं नतिरस्तु श्रीराम जयराम जय जय राम मूषकवाहनाय नमो नमः शिवाय नमो नमः स्त

शंकितायेति. शंकितायनायिकायामनिवेस्ताय ×श्व× अस्याः स्नेहोस्तिवानवेतिदयितयेर्ष्ययाविमुखि
तांविमुखीकृतांअतएवकृतबाष्पानिपातांमानिनीघनरोमविभेदःसांस्पुलकोदयोभिमुखमाहितंचित्तंययासा
तांनिःकोपामित्यर्थः शंसतिस्मव्यनक्तिस्मेत्यर्थः अन्यथासात्विकानुदयादितिभावः ४६ अथसंभोग
शृंगारमाह तत्रापिबाह्यसुरतमाह लोलेति प्रियतमेलोलदृष्टिंचचलेक्षणंदयितायाः वदनंरभसे
नबलात्कारेणचुंबतिसति चिनीविनिर्गतबंधनंअंशुकंनितंबाद्व्रीडयासहशिथिलतामुपपेदे उभय

शंकितायकृतबाष्पनिपातामीर्ष्ययाविमुखितांदयिताय मानिनीमभिमुखाहितचित्तांशंसति
स्मघनरोमविभेदः ४६ लोलदृष्टिवदनंदयितायाश्चुंबतिप्रियतमेरभसेन व्रीडयासहचिनीविनि
तंबादंशुकंशिथिलतांप्रतिपेदे ४७

मपिशिथिलमासीदित्यर्थः अत्रसव्रीडांशुकबंधविभेदनि
वृत्तितद्रूपश्लेथित्यस्याभेदाध्यवसायिनिर्बंध्यातिशयोक्तिमूलःसहोक्तिविशेषणालंकारः अतएवव्री
डांशुकोपमेयंचकल्यं बाह्यमभ्यंतरंचेतिद्विविधंरतमुच्यते तत्राद्यंचुंबनाश्लेषनखदंतक्षतादिकं द्वितीयंसु
रतंसाक्षान्नामकारणकल्पितमिति ४७ श्रीलंकाधीशारिपवेनमोनमः श्रीगजाननायनमोनमः

हृतयेति गलितनीविगलितबंधनं तथा प्रथवलं बिताकांचीयेन तत्कांचीलग्नमित्यर्थः यदुत्तरीयमध्योंशु
कं अंतरीयोपसंव्यानपरिधानान्यधोंशुकं इत्यमरः निरस्यन्नपहरन् हृदयेशः प्रियः हृतया वस्त्रापग
माल्लज्जितया ह्रीधातोः कर्तरि क्तः दयितया मंडलीकृतः पृथुस्तनभारो यस्मिन् कर्मणि यथा भवति तथा गाढमि
त्यर्थः सस्वजे आश्लिष्टः प्रियदृष्टेः प्रतिबंधनादिति भावः ४८ आहतानीति परिरंभाः आलिंगना
नि नखपदैर्हेतुभिराहतान् अभिमतानि हेतानीति तृतीया तथा चुंबितानि घनदंतनिपातैर्गाढदंतनि

हृतया गलितनीवि निरस्यन्नंतरीयमविलंबितकांची मंडलीकृत[...] पृथुस्तनभारं सस्वजे दयि
तया हृदयेशः ४८ आहतानखपदैः परिरंभाश्चुंबनानि घनदंतनिपातैः सौकुमार्यगुणसंभृतकीर्ति
र्वाम एव सुरतेष्वपि कामः ४९

पातैर्हेतुभिराहतानीति लिंगविपरिणामः सुरतेषु रखोद्दीपकत्वा
द्दंतनखपूर्वकेषु आलिंगनचुंबनेष्वादरो संप्रवृत्त इत्यर्थः ननु सुकुमारकामतंत्रे कथं पीडाकरत्वाद
रतिवाच्यं इत्याह सौकुमार्यमेव गुणः तेन संभृतकीर्तिः कामः सुरतेष्वपि संभोगेष्वपि न केवलं
विप्रलंभेष्विति भावः वामः क्रूर एव सुकुमारः कामः इति वादमात्रं वस्तुतस्तु पीडयत्येव सुखमावह
तीत्यर्थः सामान्येन विशेषणसमर्थनरूपो र्थांतरन्यासः ४९ श्रीलंकाधिपरिपवेनमानम

आभ्यंतरमाह पाणीति. रहस्यिकांतेऽवनितविभ्रमं भानिभृयोषितः गद्गदवाच्यास्खलितगिरां योषितां संबंधीनि पाणिपल्लवविधूननमंतः सीत्कृतानि सीत्काराः एतेन कुट्टमिताख्यो भाव उक्तः अधरपीडनादौ सुखेऽपि दुःखवदुपचारः कुट्टमितामितिलक्षणात् नयनानामर्धनिमेषाः अर्धनिमीलितानि तथा विभूषणसामर्थ्यात्भ्रंगद्गदकंठकं चेत्येतानि मदनस्यास्त्रतामुपययुः शस्त्रवत्पुंसामुद्दीपनान्यासन्नित्यर्थः अत्र सीत्काराधनिमेषादिना सम्बपारवश्यं गम्यते तदुक्तं रतिरहस्ये सस्तावपुषिमी

पाणिपल्लवविधूननमंतः सीत्कृतानि नयनार्धनिमेषाः योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य ५० पातुमाहितरतीन्यभिलेषुस्तर्षयं सपुनरुक्तरसानि सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ५१

ललनं कुचोर्मूर्छनाचरति भे लोलक्षणं श्लेषयत्यजघनं मुहुर्मुहुः सीत्करोति गलत्‌ज्ञयाकुलेति ५० अथ मधुपानवर्णनमारभते पातुमिति युवानः आहितरतीनि वर्धितरागाणि अत एव पुनरुक्तरसानि पुनः पुनः पानेऽप्यपूर्वस्वादानि अत एव तर्षयंतीति तर्षाणि आनयंतीत अभिकराणीतीत्यर्थः सस्मितानि वधूनां वदनानि सोत्पलानि मधूनि च पातुमभिलेषुः अत्र प्र
म्य स्तुतानामेव वदनानां मधूनां च पानक्रियायोगैपम्यत्वे केवलं प्रकराणिक विविषयस्तु त्ययोगितालंकारः प्रस्तुतानां तथान्येषां केवलं तु तुल्यधर्मतः औपम्यं गम्यते यत्र समता तुल्ययोगितेति लक्षणात् ५१ श्री रा

दे

कांतेति कांतसंगमेनपराजितमन्योत्यक्तरोषे तदवधिकत्वात्तस्येतिभावः वारुणीरसेनमध्वासवेनमूर्तांतो
विवादोवाक्कलहादिर्यस्यतस्मिन्कृतः उपाहितसंधौप्रियैः सहकृतसंधानमानिनीजनेविषयेऽनंगोधनुषी
षुनसंदधे सिद्धसाध्यसाधनवैयर्थ्यादितिभावः। इषुसंधानकार्यंस्वतएवसिद्धमितिबाणमोचनंकृतवा
न्कामइतिभावः। ५२ कुप्यतेति यूनः प्रियान्कुप्यतकोपंकुरुत नात्रक्रुधद्रुहेत्यादिनायूनांसंप्रदान

कांतसंगमपराजितमन्योवारुणीरसनष्टांतविवादे मानिनीजनउपाहितसं
धौसंदधेधनुषिनेषुमनंगः ५२ कुप्यताशुभवतानतचित्ताःकोपितोश्चवरिव
स्यतयूनः इत्यनेकउपदेशइवस्मस्वाद्यतेयुवतिभिर्मधुवारः ५३ रामचंद्र

त्वंतस्यप्रियंप्रतिकोपंरतियावत् पोपस्तावत्कृत्रिमइत्याशुआनतचित्ताअनुकूलचित्ताः भवत किंचकोपि
तांस्तानूवरिवस्यतपरिचरत नमोवारिवोश्चित्राङः क्यविवंसः परिचर्यायामित्यर्थः नियमश्चइत्येवम
नेकानेकप्रकारउपदेशः प्रवर्तकंवाक्यंस इवमधुवारोमधुपानावृत्तिः मधुवारामधुक्रमाइत्यमरः
युवतिभिः स्वाद्यतेस्म मधुवारस्यकोपादिकार्यप्रवर्तकत्वसाम्यादुपदेशइवेत्युत्प्रेक्षा अनियताःख
लुमत्तचेष्टाइतिभावः ५३

नि

भर्तृभिरिति भर्तृभिः प्रणयसंभ्रमाभ्यां दत्तां संभ्रमः साध्वसेपि स्यात् संयोगो द्वयोरपीति वैजयंती
अत एवातिरसामधिकस्वादां वारुणीं वरुणात्मजां सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजेत्यमरः
रसयित्वा स्वाद्यैव वधूभिर्ह्रीर्विमोहविरहान्मदेन जाड्यापगमाद्धेतोः पाटवं नु श्लाघवं नु हृदयं नु ज्ञानं नु
उपलेभे अत एव हृदयस्येत्र कार्यज्ञानसामर्थ्यात् हृदयमेव वा प्रागसत्त्वमपि लब्धमिति संदेहः अन्यथा
कथं प्रियं प्रत्येवं वक्रोक्त्याद्यर्थेषु प्रवृत्तिरिति भावः संदेहालंकारः ५४ स्वादितमिति स्वयं स्वादि

भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिसारं रसयित्वा ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ५४
स्वादितः स्वयमर्थेधितमानं लंभितः प्रियतमैः सहपीतः आसवः प्रतिपदं प्रमदानामनेकरूपरसतामिव भेजे ५५

तः स्वयमेवादौ पीतः अर्थेत्यनंतरं प्रियतमैरधितमानं वर्द्धितबहुमानं यथा तथा लंभितो ग्राहितः स्वहस्तेन
प्रापितइत्यर्थः ततः प्रियतमैः सह पीतः युगपदेकपात्रेण पीत इत्यर्थः आसवः प्रमदानां प्रतिपदं प्रतिवारं
नैकरूपरसतामनेकविधस्वादत्वं नञर्थस्य नशब्दस्य सुप्सुपेति समासः नञ्समासे नलोपः स्यात् भेजेइ
व प्रापेव उपचारविशेषाद्द्रव्येषु रसविशेषः स्यादिति भावः आस्वादनादिपदार्थानामनेकरसतापादकहेतुक
त्वात्काव्यलिंगं तावदेकं स्वादनादीनामनेकधर्माणामेकस्मिन्नेवसर्वक्रमेण संबंधात्पर्यायभेदश्चैतयोश्च
संसृष्टयोरनेकरसत्वादुत्प्रेक्षाबीजत्वात्तया सहांगांगीभावेन संकरः ५५ श्रीरामचंद्रगुरुभ्यो नमः

भ्रूविलासेति भ्रूविलासैः सुभगान्वधूनयनानां विभ्रमाननुकर्तुं नेत्राणां समीकर्तुमिवेति फलो
त्प्रेक्षार्थत्वान्मृदुविलोलपलाशैरिषच्चलदलैरुत्पलैश्चषकेषु या वीचयो ऊर्मयस्तासु यः कंपः स आदरे
स्वीकृतः ननु स्वतः कंपस्तस्य विलोलविशेषणेनैवोक्तत्वात्तत्स्वीकारश्च तद्योग एव पूर्वं नेत्रमात्रसाम्यभाजा
मुत्पलानां कंपमानवीचियोगात्स भ्रूविलासनेत्रसाम्यं जातमित्यर्थः ॥ ५६ ओष्ठेति ओष्ठ एव पल्लवस्तस्य
विदंशो दशनैरुचिरभिलाषो येषां तेषां मुखस्फुरासपानमिषेणाधरपिपासेतामित्यर्थः रमणानामन्येवनी

भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानां आददे मृदुविलोलपला
शैरुत्पलैश्चषकवीचिषु कंपः ५६ ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणा
नां फुल्ललोचनविलोलसरोजैरंगनास्यचषकैर्मधुवारः ५७ श्री[illegible]चंद्रप्रस

लसरोजानि येषु तैः अंगनास्यान्येव चषकाणि पानपात्राणि चषकोऽस्त्री पानपात्रमित्यमरः तैर्म
धुवारो मधुपानावृत्तिः हृद्यतां हृदयस्य प्रियत्वमुपययौ हृदयस्य प्रियवृत्तिर्यस्मात्स्य यः हृदयस्य हल्ले
खवयदनलासेषु इति हृद्यः रमणाविशेषणपार्थहेतुकंकाव्यलिंगसंकीर्णरूपकालंकारः ५७ श्राम

प्राप्यतइति गुणवताप्याश्रयवशेनगुणानांविशेषः प्रकर्षः प्राप्यते व्यक्तं तत्तथायदुक्तं तत्तथैवेत्यर्थः हि
यस्माद्दयितानायोआननेनदत्तंमधुरसातिशयेनस्वादप्रकर्षेणकर्त्राव्यानशेव्याप्तं विशेषणसमर्थनरूपोर्थां
तरन्यासः ५८ वीक्ष्येति रत्नचषकेषुस्फटिकादिमणिपात्रेषु अतिरिक्तांयाचकापगमात्पूर्वाभ्यधिकां
कांतस्ययद्दंतपदंतदेवमंडनंतस्यलक्ष्मींशोभांप्रतिबिंबितामितिशेषः वीक्ष्यओष्ठयावकनुदोधरला

प्राप्यतेगुणवतापिगुणानांव्यक्तमाश्रयवशेनविशेषः तत्तथाहिदयितान
नदत्तंव्यानशेमधुरसातिशयेन ५८ वीक्ष्यरत्नचषकेष्वतिरिक्तांकांतदंतप
नदमंडनलक्ष्मीं जज्ञिरेबहुमताःप्रमदानांओष्ठयावकनुदोमधुवारः ५९

क्षारागहारिणोमधुवारामधुपानाभ्यासाः प्रमदानांबहुमताअभिमताः वर्त्तमानेक्तः कृद्योगात्षष्ठी ज
ज्ञिरेजाताः तेषांप्रियानुरागचिन्हप्रकाशकत्वादितिभावः ५९ श्रीरामचंद्रप्रसंनोवरदोभवतु ० राम

मधुपानाद्धि लोचनेषु रागोस्य त्विरधरेभ्यश्च लाक्षा[illegible]रागनिवृत्तिर्मध्वाननयोश्चान्योन्यगंधसंक्रांतिरिति
स्थिते सत्य त्रेक्षते लोचनेनेति लोचने चाधरश्च लोचनाधरं सौप्राभावद्वन्द्वनिव्यभिचार ज्ञापकानधरशब्दस्य
न पूर्वनिपातः कृतश्चासावाहृतश्चेति विशेषणसमासः लोचनाधरस्य कृताहृतः रागो यया सा तथोक्ता
लोचनयोः कृतरागा अधराद् आहृतरागा चेत्यर्थः षष्ठ्येव स्वार्थस्य संबंधसाम्ययोग्यविशेषपर्यवसाननिय
मेनाधिकरणापादानार्थयोराक्षेपात् तथा चाधरलोचनगुणयोः रागतद्विरहयोः स्थानविपर्यवृत्तिं न ५

लोचनाधरकृताहृतरागा वासिताननविशेषितगंधा

कृतवतीत्यर्थः तथा वासितेन स्वगंधसंक्रांतिमत्कृतेनाननेन विशेषितोतिशायितो गंधो यस्याः सा यद्वा
वासिताननाचार्थाद् आननेनैव विशेषितगंधा चेति कृतबहुव्रीहिविशेषणसमासः उभयत्राप्याननसंक्रां
तस्वगंधा स्वक्रांताननगंधा चेत्यर्थः एवंभूता वारुणी मदिरा परयोर्लोचनाधरयोर्गुणोपचयपरस्याननस्य गु
णः आत्मनो वारुण्याः गुणः परगुणात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने किं तेन ग्रामादिकी वस्तुपरि

वृत्तिर्व्यत्ययः बुद्धिपूर्वविस्तृतविपरिवृत्तिर्विनिमयः उपमानपूर्वपदबहुव्रीहिवत्तथायमर्थः परगुणयो
र्लोचनाधरयोर्गुणयोर्गुणयोः रागतद्विरहयोर्व्यत्ययंनु विनिमयंनु वितेने तथापरगुणात्मगुणयोराननं
गंधाभ्यां गंधयोश्चव्यत्ययंनु विनिमयंनु वितेने अन्यथा कथमन्यस्मिन्नन्यधर्मोपलंभः संभवतीतिभावः भ

वारुणीपरगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ६०

अत्र लोचनाधररागयोस्तदभावयोर्वाभेदेप्याभेदाध्यवसायादेकत्ववाचोयुक्तिः तन्मूलातिशयोक्त्यनुप्रा
णिताचेयं व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेतिसंक्षेपः साच प्रतीयमानव्यंजकाप्रयोगान्नु शब्दस्तत्संकृये ६० राम

नो

तुल्येति अक्ष्णोस्तुल्यरूपमक्षितुल्यरूपाकृति योषितः कर्णगं कर्णगतं असितोत्पलं निरूपकार्यनुपकारकं वि
दित्वा मत्वा तत्कार्यशोभायाः कर्णान्तविश्रांतेनाक्ष्णो वक्तत्वादिति भावः मद्रागः सुहृदिवोत्पलस्य बंधुरि
वा निष्टनिवारकत्वादिति भावः लंभितेक्षणरुचिरावृतनयनकांतिः सत्प्रविभेजे वर्णान्तरापादनेन प्र
विभक्तः सन्चे लक्षण्यादक्ष्णोर्व्यावर्तयामास ननो वैशिष्ट्यष्टकरत्वादिति भावः ६९ क्षीणेति अ

तुल्यरूपमसितोत्पलमक्ष्णः कर्णगं निरूपकारि विदित्वा योषितः सुहृदिव प्रविभेजे लंभितेक्ष
णरुचिर्मदरागः ६९ क्षीणयावकरसोप्यतिपाने कांतदंतपदलंभितशोभः आययावतितरा
मिव बध्वाः सांद्रतामधरपल्लवरागः ६८

निपाने क्षीणयावकरसोपिक्षालितालक्तकोपि कांत
दंतपदे संभृतालंभिताशोभायस्य सः वध्वा अधरपल्लवरागो ऽतितरामतिमात्रं अतिशब्दात्तरप्प्रत्य
यः किमेतिङ् व्य[illegible]येत्यादिना आम्प्रत्ययः तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञा सांद्रतामाययाविव प्रि
योपभोगाचिन्हमंडितानां कामिन्यवयवानां किमन्यैर्मंडनैरिति भावः नत्रक्षीणस्यापि सांद्रतेति विरोधा

रफ्फं गां रेखेशांबिवोरवणाशागेसारसवै
रम्याकोशाशिंगामंसेकीर्णानेशेसखा ९८

किरात
शिव
३८

रागेति वनितानां सर्वगापि सर्वगतापि अंजडेत्यादिनाऽनुप्रत्ययः मदश्रीः रागेण कांतानि नयनानि येषु तेषु विद्रुमवदरुणा कपोलतलानि येषु तेषु मुखेषु दर्पणेष्विव नितांतं ददृशे तेषां नयनादीनां निर्मलत्वेन रागा
भिव्यक्तिसंभवादिति भावः अत्र मदश्रीः सर्वगतापि मुखेष्वेव ददृशे इति विरोधस्तस्य मुखविशेषणैः
समाधानात्काव्यलिंगानुप्राणितो विरोधवदाभासोऽलंकारः साचोपमासंसृज्यते ६३ बद्धेति बद्ध

रागकांतनयनेषु नितांतं विद्रुमारुणकपोलतलेषु सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ६३ बद्धकोपविकृतीरपि रामाश्चारुतामभिमतामुपनिन्ये वश्यतां मधुमदो दयितानां आत्मवर्गहितमिच्छति सर्वः ६४

कोपेन विकृतिर्याभिस्तथाभूता अपि रामाः कर्म चारुतां तासां सौंदर्यं कर्तृ अभिमतां प्रियबालुभ्यमुपनिन्ये सौंदर्यं विकृतिरपि रोचयत इति भावः मधुमदो दयितानां वश्यतां विधेयत्वमुपनिन्ये तथाहि सर्वः आत्म
वर्गहितमिच्छति अतश्चारुतास्त्रीत्वात्स्त्रीणामुपचकार मधुमदस्तु पुंस्त्वात्पुंसामिति युक्तमित्यर्थः
अत्रावि कृतोपि अभिमताः कुपिता अपि वश्या इति विरोध[illegible]स्याचारुतामदभ्यासाधनादुभयथापि वि रोधाभासो भवन्नर्थान्तरन्यासेन संसृज्यते ६४

वाससामिति उपनाभिनाभिसमीपे वाससां श्लथितानां ह्रीनिरासं लज्जात्यागं अपदे कुपितानि अस्थान कोपांश्च गुणपक्षे गुणकोटौ विदधती निवेशयन्ती दोषानपि तान् गुणीकरोतीत्यर्थः मदिरा योषितां च वच नीयं न ना भिंदन्त्ये दिति शास्त्रनिषिद्धाचरणनिंदां निर्ममाज तथा दोषाणामपि वस्त्रश्लथित्यादीनां गुण वत्त्वान्न कश्चिद्वचनीयावकाश इत्यर्थः ॥५॥ भर्तृष्विति उपसखीः सखीसमक्षं समीपार्थेऽव्ययीभावः आ

वाससां श्लथितानामुपनाभि ह्रीनिरासमपदे कुपितानि योषितां विदधती गुणपक्षे निर्ममाज मदिरा वचनीयं ॥५॥ भर्तृषूपसखि निक्षिपतीनामात्मनो मधुमदोद्यमितानां व्रीडया विफलया वनितानां न च्छिन्नं न विगतं हृदयेषु ॥६॥

त्मनो देहात् आत्मा देहे धृतो जीवे स्वभावे परमात्मनीति वैजयंती भ र्तृषु निक्षिपतीनां भर्तृपार्श्वमुपरि निपतन्तीनामित्यर्थः आच्छिन्नद्योर्नुमङ्ग इति विकल्पान्नुमभावः मधुम देनोद्यमितानां प्रेरितानां न तु स्वेच्छयेति भावः वनितानामनुरक्तस्त्रीणां वनिताजनितात्यर्थानुरा गायां च योषितीति विश्वः हृदयेषु विफलया अनुचिताचरणादिति भावः व्रीडया न च्छिन्नं न विगतं वैफल्या त्तस्य मदोपाधिकत्वाच्चेति भावः अत एव नोभयनिषेधविरोधः ॥६॥ श्रीनारायणगुरुचरणाभ्यां ॥

रुंधतीति नयनानां वाक्यानां च विकासं प्रागा[illegible]त्मीयं रुंधती प्रतिबध्नती तथा परिरंभे आलिंगने सादि
तौ स्तंभितावुभौ करौ यया सा युवतीनां संबंधिनी क्षीबता मत्तता कर्त्री रिक्तः अनुपसर्गात् फुल्लक्षीबकृशो
ल्लाघा इति निपातनात्साधुः तासां भावः क्षीबता तत्तलोर्गुणवचनस्य एकवज्ञावो वक्तव्यात् बहुगुणै
र्दृष्टिसंकोचादिभिः व्रीडितस्य व्रीडायाः भावे क्तः ललितं विलासमनुजह्रे अनुचकार कर्त्तरि लिट् व्रीडा

रुंधती नयनवाक्यविकासं सादितोभयकरा परिरंभे व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैर
नुजह्रे ६७ योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयितांकं कारयत्यनिभृता गुणदोषे वा
रुणी खलु रहस्यविभेदं ६८

कार्यकारणकला व्रीडानुकारयोरित्यरूपमालंकारः ६७ योषिदिति
उद्धतउत्कटो मनोभवेन यो रागो यस्याः सा योषिन्मानवत्यपि दयितस्यांकं ययौ यतो मानाद्रागो बलीयानि
ति भावः लाघवदोषं परिहरति कारयतीति अनिभृता चपला नकार्यकारिणीत्यर्थः वारुणी मदिरा
गुणेषु दोषेषु च विषये सर्वो द्वंद्वो विभाषयैकवद्भवति रहस्यविभेदं रहस्यभंगं कारयति खलु निगूहिता
वपि गुणदोषौ प्रकाशयतीत्यर्थः ततो निगूढरागप्रकटनं प्रकटमानत्यागश्च मत्तायाः न लाघवमा

आहितेति मधुनामद्येनचेष्टितस्य व्यापारस्य मधुरत्वे आहितेनु प्रागसत्येव मनोहरत्वे संप्रत्युत्पादि
तइव विकासंगमितेनु प्रकसत्येव माधुर्ये प्रकर्षं प्रापितइवोद्भूतरागाउद्रिक्तरागोऽतएव कुसुमेषोः कामिनी
ष्ववसरप्रवेशो नवद्रवाबभौ नित्यसंनिहितोपिमदनः कामिनीषु मदकृतानात्कालिकचेष्टामाधुर्यातिरागो
द्रेकेसत्य पूर्ववदुद्दीपितइत्यर्थः संभाव्यानुप्राणितेयमुत्प्रेक्षा ६९ मागमन्निति शंकितनाथाः अविश्वस्त

आहितेनु मधुना मधुरत्वे चेष्टितस्य गमितेनु विकासं आबभौ नवद्रवोद्धतरागः कामिनीष्ववस
रः कुसुमेषोः ६९ मागमन्मदविमूढधियो नः प्रोज्झ्य रंतुमिति शंकितनाथाः योषितोनुमदि
रांभृशमीषुः प्रेम पश्यति भयान्यपदेपि ७०

पुरुषाः योषितो मदेन विमूढधियो नष्टबुद्धीर्नोस्मा
न्प्रोज्झ्य विसृज्य प्रपूर्वादुज्झतेः समासेनञ्पूर्वोक्त्वाल्यप् रंतुं क्रीडितुं मागमन्नगच्छन्त्विति मनीषायेति
शेषः गामेर्लुङि लिङि नमायोगइत्यडागमे गमप्रतिषेधः मदिरां भृशं अत्यंतं नेषुः नैच्छन्तिस्म भर्तृवियोग
भयादत्यर्थं न पपुरित्यर्थः किंतु ईषदेव पपुरित्यर्थः तथाहि प्रेमस्नेहो अपदेऽस्थानेऽपि भयान्यनिष्टा
नि पश्यतिउत्प्रेक्ष्यते स्वीकुरुतइतियावत् शंकाहेतोः प्रेम्णि कर्तृत्वोपचारः ७० सो बायनमः

चित्तेति चित्तनिर्वृत्तिविधायि सुखकरं विविक्तं विजनप्रदेशः विविक्तौ पूतविजनावित्यमरः र
हो विविक्तं रहसि स्मृतमिति विश्वः विविक्तं जनरहितमिति विश्वः मन्मथो मधु मद्यं मदः शां
तिभासः स्वच्छंदं किरणाः दयितैः सह संगमश्च वृद्धायूनेति निपातनात्साकं सार्धं समं योगेपि सहार्थे तृ
तीया एतानि प्रमदानां प्रेम वियोगासहत्वावस्था संभोगं कामपि भुवं कांचिद्भूमिं नयंति स्म रत्यवस्था
मप्यातिन्यस्य शृंगारावस्थां क्रीडामयीं निन्युरित्यर्थः प्रेमाभिलाषो रागश्च स्नेहः प्रेम रतिस्तथा शृंगा

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः संगमश्च दयितैः स्म नयंति प्रेम कामपि भुवं प्रम
दानां ७१ धार्ष्ट्यलंघितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये मानिनीरतिविधौ कुसुमेषुर्मत्त
मत्त इव विभ्रममाप ७२

रश्चेति संभोगः सप्तावस्थाः प्रकीर्तिता इति रत्नाकरे प्रेमादिलक्षणमेषु तत्र दृ
तान्यभिलाषुकः रागस्तत्संगबुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनं शृं
गारस्तत्समं क्रीडा संभोगः सप्तधा क्रमः ७१ क्रीडावस्थामाह धार्ष्ट्येति धार्ष्ट्येन प्रागल्भ्येन लं
घिता यथोचिता भूमिर्मर्यादा यस्मिन् तस्मिन् यो रते चुंबनताडनभणितसीत्कारपुरुषायितादौ स्वयमुपक्र
मलवृत्तिरिति भावः निर्दयं यथा तथा विलुलितानि आकर्षणाकुलितान्यलकमाल्यानि यस्मिन्मा

निनीनां रतिविच्छेसुरते कुसुमेषु मंत्रमत्तः मत्तप्रकार इव वि[illegible] भ्रमं विजृंभणमंपामतः किंनकरोती
तिभावः कारतीरकर्त्तृ लोपचारा द्वियमुत्प्रेक्षा ७२ शीधुपानेति नीधुपानेनमद्यपानेनविधु
व रेषुविकलेषु अतएव वपुष्षु अंगेषुनिघ्नतांप्रियपराधीनतामुपगतेषुसत्सु अधीनोनिघ्नआय
त्तइत्यमरः वधूनांसंबंधिनिरतिरसेस्मरतस्वादे आहितभावं दत्तचित्तंकामिषु विषये ई हि
तंचुंबनताडनादि चेष्टितं वीतलक्ष्यं निर्बीजमस्थानकृतमपीत्यर्थः रेजे रागिणांसवलितमभि

नीधुपानविधुरेषुवधूनांनिघ्नतामुपगतेषुवपुष्षु ईहितं रतिरसाहितभावं वीतलक्ष्यमपिका
मिषुरेजे ७३ अन्योन्यरक्तमनसामथबिभ्रतीनांचेतोभुवः स्मरसखापूरसांनिदेनूं वैबोधि
कध्वनिविभावितपश्चिमार्द्धासासंहृतेवपरिवृत्तिमियायरात्रिः ७४ रामचंद्रप्रसन्न
नीभतइत्यर्थः नोपमालंकारः ७३ अन्योन्येति अथस्मरसखाइंद्रसचिवागंधर्वास्तेषाम
रा पूरसांचान्योन्यरक्तमनसांपरस्परानुरक्तचित्तानांचेतोभुवोनिदेशमाज्ञांउपबिभ्रतीनांस्मरवि
धेयानांतासुरमणानामित्यर्थः षष्ठीचानादरे विबोधःप्रबोधनंशीलमेषांवैबोधिकावैतालि

कोः नीलमितिठक् तेषांध्वनिभिर्मंग
लरवैर्विभाविताऽभ्यूहितःपश्चिमा
र्द्धःचरमभागोयस्याःसातथोक्तासा
रात्रिःसंहृतासंश्लिष्टेवस्फस्त्रेक्षासु

खिनां भूयानपि कालो लघीयानुभव
तीतिभावः परिवृत्तिं विपरिवृत्तिरूया
ताल्पाभूदित्यर्थः ७४

निद्रेति निद्राया विनोदितो ऽपनीतो नितांतं तयोरत्याः कुमः श्रमस्तेषामायामि भिरायामवद्भिर्दीर्घैर्मंगल
निनादैर्वैबोधिकध्वनिभिर्विबोधितानां यूनां रामास्र[illegible]भावविनाविरहेणाकुलितासु सतीषु रता
नितान्येव पूर्वाणि तेषां भावस्तत्सूचितां समादधिरे इव प्राप्तुरिवेत्यपेक्षा भयस्करतनवदादरात्मवर्तंत इत्यर्थः
यदुत्तरकालं दुर्लभं तदपि तत्क्षणमनुभूयत इत्यर्थः ७५ कांतेति सुरतखेदनिमीलितान्यक्षीणि य

निद्राविनोदितनितांतरतिक्लमानामायामिमंगलनिनादविबोधितानां रामासु भावविरहाकुलिता
सु यूनां तत्पूर्वतामिव समादधिरे रतानि ७५ कांताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुप
यानिव मंदमंदं हर्म्येषु माल्यमदिरापरिभोगगंधानाविष्कारर जनीपरिवृत्तिवायुः ७६ राम

न कांताजनं संवाहितुं सेवितुमिव खेदापनोदादित्यर्थः अंगमर्दनं कर्तुमिवेत्यर्थः संवाहनं वाहनेपि नरा
देरंगमर्दनेइति विश्वः वाह प्रयत्न इति धातोस्तुमुन् अन्यथा वाहयितुमिति णिच्ग्रहणं स्यात् मंदमंदं म
दप्रकारे प्रकारे गुणवचनस्यापि द्विर्भावः कर्मधारयवद्भावात्सुब्लोपः समुपायान्संवान् रजनीपरिव
त्तिवायुर्निशावसानवायुः हर्म्येषु माल्यानि मदिरापरिभोगेषु विमर्दैश्च तेषां गंधानाविष्कारबहिः

[illegible]

आमोदेति आमोदेन मद्यगंधेन वासिताः सुरभिताश्चलाः दष्टमुक्तत्वात्स्फुरंतश्चाधरपल्लवाः येषु ते
षु निद्रया कषायितान्यपटूकृतानि विपाटलानि श्वेतरक्तलोचनानि येषु तेषु कषायस्तुवरेन स्त्रीनि
र्यासिरजकादिनि रतभावेकटौरक्तेमधुरे लवणेपि चेति केशवः व्यामृष्टाः पत्राणि तिलकाश्च येषां
तेषु विलासिनीनां वदनेषु मदस्यावशेषः शोभां बबंध मंडनांतरापायमदशेष एव मंडनं बभूवे

आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु व्यामृष्टपत्रतिलकेषु विलासिनी
नां शोभाबबंध वदनेषु मदावशेषः ७७ गतवति नखलेखालक्ष्यतामंगरागे समदयितपीता
ताम्रविंबाधराणां विरहविधुरमिष्टा सत्सखीवांगनानां हृदयमवललंबे रात्रिसंभोगलक्ष्मीः ७८
इति श्री किरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ निशाविहारो नाम नवमसर्गः समाप्तः

त्यर्थः स्त्रीणां मद एव मंडनमिति भावः ७७ गतवतीति अंगरागे नखरेखासु नखपदेष्वेवल
क्ष्यतां दृश्यतां गतवति सति विमर्दनात्तत्राबशेषे सतीत्यर्थः किंच बिंबतुल्या अधरा बिंबाधराः
शाकपार्थिवादिवत्समासः मध्यमपदलोपी समानाधिकरणसमास इति वामनः समदैर्दयि

नेः पीताः पीडिता अतएव पीडनादाताम्राः समंताद्रक्ताबिंबाधरा यासां तासामंगनानां विरहेणा
न्हिकेन वियोगेन विधुरं विह्वलं हृदयं रात्रिसंभोगलक्ष्मीर्न खपदादिरिग्मेत्यर्थः दृष्ट्वा ह्रास सखीव नि
पुणा सहचरीवावलंबे अधरयामास प्रियोपभोगचिन्हलालसाः कथंचिद्विरहदुःखमसहंत
इत्यर्थः प्रतिपर्णोपमालंकारः मालिनीवृत्तं ७८ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथ
सुरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां नवमः सर्गः समाप्तः ९ ॥

57

श्रीगणेशाय नमः ॥ अथागंतुकसहजशोभासंपन्नतया समग्रसाधनाः स्त्रियो मुनिमनःप्रलोभनार्थं प्रास्थ
न्नित्याह ॥ अथेति अथ प्रभाते परिमंडलजां संभोगसंभूतां लक्ष्मीं शोभामवाप्य परिमर्द्दः परिमलस्तु
निर्वेजयंती संभोगात् स्त्रियः शोभं तदुत्थितिषंयपथः एतेन आगंतुकशोभासंपत्तिरुक्ता अत एव स्त
रतादिवर्णनस्य प्रस्तुतोपयोगित्वं चोक्तं सहजशोभासंपत्तिमाह अवयवेर्दीपि तामंडिता मंडनश्रीः
प्रसाधनशोभाया अभिस्तारम्यहावा मनोहरा विभावाः ताः स्त्रियो वसतिं स्थानं विहाय सुरपतिसूनोर

श्रीगणेशाय नमः ॥ अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमंडनश्रियस्ताः वसतिम
भिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः १ द्रुतपदमभियातुमिच्छतीनां ग
गनपरिक्रमलाघवेन तासां अवनिषु चरणैः पृथुस्तनीनामलघुनितंबतया चिरं निषेदे २

र्जुनस्य विलोभनाय जग्मुः अत्रावयवदीपनतया प्रसिद्धस्य मदनस्य तद्रूप्यत्वात् संबंधेपि संबं
धाभिधानाद् अवयवसौंदर्यातिशयद्योतनार्थादतिशयोक्तिरलंकारः अस्मिन्सर्गे पुष्पिताग्रावृत्तं
युग्जनयुगतोयकारयोयुजि च तजो जरगाश्च पुष्पिताग्रादिति लक्षणात् १ द्रुतपदमिति गगनप

किरात
टीका
४३

सर्गसटी१

रित्क्रमत्लाघवेनगगनगमनपाटवेनद्रुतपदंयथातथाऽभियातुंगंतुमिच्छतीनांकिंचपृथुस्तनीनांता
२ सामप्सरसांचरणौलघुनितंबतयास्थूलनितंबत्वेनअवनिषुचिरंनिषेदतस्थे अभ्यासपाटवेनमन
सात्वरमाणानामपितासामप्सरसांस्तनजघनभाराच्चरणानोत्तस्थुरित्यर्थः २ निहितेति निहिताः
सरसयावकाःसांद्रलाक्षारागायेषुतैर्वधूनांचरणतलैः कृतपंक्तिः कृतलेखाअतएवारुणिताः
अरुणीकृताःनीलास्तृणोलपाःतृणानिदूर्वादीनिउलपाबल्वजाख्यास्तृणविशेषाश्चयस्यांसाउ

निहितसरसयावकैर्बभासेचरणतलैःकृतपंक्तिर्वधूनां अविरल
विततत्क्षमाक्रगोपैररुणितनीलतृणोलपाधरित्री ३ रामचंद्रप्रस

लपाबल्वजाःप्रोक्ताइतिहलायुधः उलपाउशीरतृणानीतिक्षीरस्वामी ब्राह्मणपरिव्राजकव
दुलपानांपृथङ्निर्देशः धरित्रीभूःशक्रगोपैरिंद्रगोपाख्यैःकीटैरविरलंनिरंतरंयथातथावि
तताव्याप्तेवलक्ष्यते शोभा बभासे ३ रामचंद्रायनमः विश्वेश्वरायनमः व्यंकटेशायनमोनमः

राम
१

ध्वनिरिति अगविवरेषु नगरंध्रेषु गुहास्वित्यर्थः प्रतिरवैः प्रतिध्वनिभिर्विततः संमूर्छितः पृथुभिः
रशनागुणानां सिंजितैः स्वनितैरनुयातोनुगतो मीलित इति यावत् स्वनितवस्त्रपर्णानां भूषणा
नां तु सिंजितमित्यमरः नूपुराणां ध्वनिर्वनानि वनानि मुखराः शब्दायमानाः समुत्सुकाः उत्कंठिता
श्च हंसाः सारसाश्च येषां तानि चक्रे अत्र हंसादिसमुत्सुकाकरणरूपेण वस्तुना तेषां मयूरादिध्व
नेः सादृश्याद्धंसातरकूजितभ्रांतिः प्रतीतेर्भ्रांतिमदलंकारो व्यज्यते ४ अवचयेति अवचयः

ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणसिंजितानुयातः प्रतिरववितततो वनानि चक्रे मुखरसमु
त्सुकहंससारसानि ४ अवचयपरिभोगवंति हिंस्रैः सहचरितान्यमृगाणि काननानि अभिदधु
रभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ५ पुष्पफलादिच्छेदनं परिभोगः उपभोग
स्तद्वंति हिंस्राः घातुकाः व्याघ्रादयः शरारुर्घातुको हिंस्र इत्यमरः तैः सहचरिताः सहचरंतः कर्तरि
क्तः मतिबुद्धीत्यादिसूत्रेण चकारात् क्तः तच्छीलितादिवद्वर्तमानार्थता अन्ये हि हिंस्रेतरे मृगाः हरिणा
दयो येषु तानि सहचरितान्यमृगाणि काननानि तथा समुदितेन साध्वसेन भीतिर्भीः साध्वसं भय
मित्यमरः विक्लवंति विक्लवं चेतश्च वधूभ्यः धृष्टक्रियाग्रहणमपि कर्तव्यमिति संप्रदानत्वाच्चतुर्थी

किरात
टीका
७४

नृपतिरिति नृपतिरेवमुनिस्तस्यपरिग्रहेण अधिष्ठानेनहेतुना सा भूः सुरसचिवानांगंधर्वाणामप्सर
सांच तेजोजहार तदाश्रमप्रवेशाद्देवनिरस्ततेजस्का अबभूवन्नित्यर्थः कथं मानुषेण्णा मानुषंते
जो निरस्तमित्यत्राह हियस्माडुपहितेअहितेपरमप्रभावधामनी सामर्थ्ये ते जसीयेस्तेषांजयिना
जयनशीलानांमहतामिति पाठे महतामुत्कृष्टानांतपसामलंघ्यंनास्तिकिमप्यसाध्यंनास्तीत्य

नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार तेजः उपहितपरमप्रभावधाम्नां
नहिजयिनां तपसामलंघ्यमस्ति ६ सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमा
नुषाणि ताभिः क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथांगलांछनानि ७ रामचंद्र

र्थः ६ सइति विस्मयाकुलाभिस्ताभिः स्त्रीभिः शुचयः सिकतायासु नासुपदरेखाभिव्यक्ती यो
ग्यास्वित्यर्थः क्षितिषूपहितानि न्यस्तानि केतुरथांगलांछनानि रेखारूपाध्वजचक्राण्येवचिन्हा
नियेषु तानि अतएवा तिमानुषाणि मानुषान्यतिक्रांतानि जिष्णोः पदानि सचकितमिवसाश्च
र्यमिवददृशिरे दृष्टानि अद्भुतवस्तुदर्शनेनाश्चर्यविस्मयो भवतीति भावः ७ श्रीगजानन

राम
२

अतिशयेति अतिशयिताऽतिक्रांता वनांतराणां द्युतिर्याभिस्तासां कुतः फलानां कुसुमानां चावचयेपि ग्र
हणेपि सैव विधा प्रकारो यासां तासां तद्विधानां त≡थैव समग्राणामित्यर्थः तरूणां वीरूधां च समृध्या
लिंगेन युवतिजनैर्मु[illegible]निप्रभावः ऋतुरिव जगृहे निश्चितः कारणतयेति शेषः ८ मृदितेति स
सलिलं आर्द्रयन् वल्कलं तदेव भारः वल्कलं वल्कमस्त्रियामित्यमरः तेन भुग्नशाखो नम्रशाखो

अतिशयितवनांतरद्युतीनां फलकुसुमावचयेपि तद्विधानां ऋतुरिव तरुवीरूधां समृध्या यु
३ वतिजनैर्गृहे मुनिप्रभावः ८ मृदितकिसलयः सुरांगनानां ससलिलवल्कलभारभुग्नशा
खः बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानां ९ रामचंद्रचप्रसेन

अत एव मृदितकिसलयो विलुलितपल्लवः क्ङितिचेति प्रतिषेधान्न मृदेर्गुणः अशोकः वृक्ष
विशेषः सुरांगनानां संबंधिनी अधिकां बहुमतिं सज्जनसेवी धन्योयमिति बहुमानं ययौ प्राप
ननु सेवकेषु का श्लाघ्यतेत्यत्राह परीति सद्गुणेति सद्गुणानां महतां परिजनतापि सज्जनसेव
कतापि गुणायोत्कर्षाय भवतीति शेषः एतेन तासां मु निप्रभावदर्शनादिवत्सारवत्त्वं गम्यते ९

किरात
शिव
४५

यमनियमेति। यमोहिंसाकालाद्यपेक्षयाशुद्धिहेतुरहिंसादिः नियमस्तदपेक्षयाशुद्धिहेतुस्तपःस्वाध्या
यादिस्ताभ्यांकृशीकृतानिअपिक्लिष्टानिदृढानिअंगानियस्यसः। विध्वस्तायुधः अतएवतपः
क्षात्रयुक्तः सार्जुनः शामः शांतिः अभ्युदयकांडेदीप्तताउग्रताअभिचारकांडेताभ्यामनुपमा
भ्यांगरीयान्गुरुर्दृग्ः। अथर्वणावसिष्ठेनकृतारचितापदानांपङ्क्तिः आनुपूर्वीयस्यसवेदश्चतुर्थवे

यमनियमकृशीकृतस्थिरांगः परिददृशेविधृतायुधः सताभिः। अनुपमशमदीप्ततागरीया
न्कृतपदपङ्क्तिरथर्वणेववेदः॥१०॥ शशधरइवलोचनाभिरामैर्गगनविसारिभिरंशुभिः प
रीतः। शिखरनिचयमेकसानुसद्मा सकलमिवापिदधन्महीधरस्य॥११॥

दइत्यर्थः। आथर्वण
स्तमन्त्रोद्धारोवसिष्ठस्तद्रूपामगः सद्वताभिः स्त्रीभिः परिददृशेदृष्टः॥१०॥ अथचतुर्भिस्तमेव रि
विशिनष्टि शशधरेति। शशधरइवचंद्रइवलोचनाभिरामैर्नेत्रा[illegible]ल्हादकैः गगनविसारिभिरंशुभिः
तेजोभिः परीतः व्याप्तः एकंसानुसद्मयस्यसः एकदेशस्थोपीत्यर्थः। महीधरस्यइंद्रकीलस्यसकलं
शिखरनिचयंअपिदधदावृण्वन्निवस्थतेक्षा॥११॥ श्रीनारायणगुरुचरणाभ्यांनमोनमः॥७ राम
३

सुरेति सुरसरित्तिगंगाकूलेपरंतपोधिगच्छन्अर्जयन् फलाभिलाषेणेतिशेषः हविः अभिलषन्
दूरुप्रमानविशेषणसामर्थ्यात्तिथा विध्यतः पिशंगबहज्जराकलापोयेनसः अतएवोपवेदिवेद्यां
विभक्त्यर्थेव्ययीभावः शिखा▪समूहैर्ज्वालाजालैः विततः हविः आज्यादिकं समभिलषन्जा
तवेदोहिरण्यंयस्मादसौजातवेदाः अग्निरिवस्थितः १२ सदृशमिति पुनराकृतेर्वपुषः आकृतिः

सुरसरितिपरंतपोधिगच्छन्विध्यतपिशंगबहज्जटाकलापः हविरिवविततःशिखासमूहैःसम
भिलषन्नुपवेदिजातवेदाः १२ सदृशमतनुमाकृतेःप्रयत्नं तदनुगुणामपरैःक्रियामलंघ्यां
दधदलघुतपःक्रियानुरूपंविजयवतीचतपःसमांसमृद्धिं १३

कथिताकृतेसामान्यवपुषोरपिइतिविश्वः सदृशंअतनुंमहांतंप्रयत्नंउद्योगंदधत् तदनुगुणांप्रय
त्नानुकूल्यगुणांअपरैरन्यैःअलंघ्यांकर्तुमशक्यामित्यर्थः क्रियतेअनेनेतिक्रियाशक्तिरुच्यतेतांक्रि
यांव्यापारंदधत् क्रियानुरूपंक्रियानुगुणंअलघुबहुमहत्तपोदधत् तथाविजयवंतीसर्वोत्कर्षव
तीविजयफलांवातपःसमांतपोनुरूपांसमृद्धिंऐश्वर्यंदधत् अत्रपूर्वपूर्वस्योत्तरस्यविशेषणतयास्थाप
नात् प्रथमे कावल्यलंकारः यथापू
र्वं परस्परविशेषणतयास्थापनेन ए
कावलीति पूर्वसूत्रात् १३

गो

चिरनियमेति पुनश्चिरनियमेन दीर्घकालतपसा कृशोपि क्षीणोपि नो लसारः उपमानपूर्वपदो बहुव्रीहिः श्रमनिरतोपि प्रकृत्या स्वभावेन दुरासदो दुर्द्धर्षः निर्जने विजने दिग्नो तिष्ठन्नपि ससचिव इव सपरिवार इव किंच मुनिरपि ऐश्वर्यरहितोपीत्यर्थः त्रयाणां लोकानां भर्त्तुस्त्रिलोकभर्त्तुः इंद्रस्य तद्धितेत्यादिना चोत्तरपदसमासः तुल्यरुचिः समानतेजाः अपि अपिशब्दः सर्वत्र विरोधद्योतनार्थः सच मुनिरत्त क्षितमहित्वं नुनिरस्तइति विरोधालंकारः विरोधाभासत्वविरोध इति सूत्रत्वात् १४ तनुमिति अवजिते

चिरनियमकृशोपि नोलसारः श्रमनिरतोपि दुरासदः प्रकृत्या ससचिव इव निर्जनेपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्त्तुः १४ कुलकं तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयंत्यः अवययुरमरस्त्रियोस्य यत्नं विजयफले विफलं तपोधिकारे १५ तिरस्कृते लोकानां सारधाम्नी सत्वतेजसी ययातां अनुपपद्येत्यादिना ङीप् त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितेत्यादिना समाहारार्थेन तत्पुरुषः पात्रादित्वात्स्त्रीत्वप्रतिषेधः तस्य गुप्तौ रक्षणे सहां समर्थां पचाद्यच् तनुं मूर्त्तिं विलोकयंत्यः अमरस्त्रियो विजयफले जयार्थे तपोधिकारे तपोनुष्ठाने अस्य अर्जुनस्य यत्नं विफलं अवययुः मेनिरे त्रैलोक्याधिपत्यादिमहत्फलसाध्यनसमर्थस्य तुच्छफलाभिलाषो मत्तमातंगमांसभोगोचितस्य कंठीरवस्य जीर्णतृणचर्वणोत्कंठेवनश्लोभामावहवतीतिभावः अत्र विशिष्टतनुविलोकनस्य चिन्होषणवैफल्यजननहेतुत्वात्स्यापदा

मुनीत्ति प्रतनुबलानि अत्यसाराणि तपांसि अधितिष्ठतः अनुतिष्ठतः मुनीन् दनुतनयान् दानवांश्च सद्यस्त
क्षण एव विलोभ्याकृष्य चिरात् कुलिशभृता शक्रेण लघुनि पदे स्थाने विहितं दत्तं स्वं स्वकीयं नियोगं अधि
कारं ताः स्त्रियो बहु यथा तथा मेनिरे निकृष्टपदवृत्तीनां उत्कृष्टपदलाभो महद्बहुमानमूलमिति भावः विलो
भ्य मेनिरे इत्यन्वयः यद्वा विलोभ्य विलोभनं कारयित्वा विहितं शक्रेणेत्यन्वयात् समानकर्तृकत्वनिर्वाहः १६

मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि अलघुनि बहु मेनिरे च ताः स्वं
कुलिशभृता विहितं पदे नियोगं १६ अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन
प्रसभमवततारचित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः १७

अथेति कृतकविलोभनं कृत्रिमरंजनं विधित्सौ विधातुमिच्छौ विपूर्वाद्दधातेः सनंताद् उः प्रत्ययः युवतिज
ने हरिसूनोः अर्जुनस्य दर्शनेन चित्तजन्मा कामः प्रसभं बलादवततार इतः स्वयं संवितुमागतस्य स्वयं
भीतिरित्यागमः यन्मुनिवंचनप्रवृत्ताः स्त्रियः तेन वंचिता इत्यर्थः युक्तं चैतत् हि यस्मात् मधुरा यौव
नश्रीः मनोहरति बलादिति शेषः १७

सपदीति वधूनां निदेशात् नियोगात् ध्वनिता नादिता मनोरमवल्लभोवीणा: मृदंगाश्च येस्ते हरिसखै: गंध
र्वै: वियति वने च युगपद् ऋतुगणस्य ऋतुषट्कस्य संन्निधानमाविर्भावो यथायथं यथास्वं असंकीर्णत्यर्थ:
यथास्वे यथायथमिति निपात: वितेने वितस्तारे उद्दीपनसामुग्रीसंपादितेत्यर्थ: १८ वर्षाक्रमेण ऋ
तून्वर्णयति सजलेत्यादि सजला जलधरा यस्मिन् तन्नभो विरेजे तडितोलतइव तासां रुचि: प्रभा विहृ

सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदंगै: युगपदृतुगणस्य संनिधानं विय
ति वने च यथायथं वितेने १८ सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लता
नां व्यवहितरतिविग्रहैर्वितेने जलगुरुभिस्तनितैर्दिगंतरेषु १९ श्रीरामचंद्रप्रस.

तिं विजृंभणं इयाय तथा व्यवहितरतिविग्रहै: प्रशमितप्रणयकलहै: जलेन गुरुभिर्जलभारा
द्गंभीरैरित्यर्थ: स्तनितैर्गर्जितै: दिगंतरेषु वितेने वितस्तारे भावे लिट् अकर्मकत्वं वैवक्षितं अ
त एव दिगंतरेषु इति अधिकरणत्वेपि प्रयोग: अन्यथा कर्मत्वमेव स्यात् १९ रामचंद्रप्रस.

परीति परिसुरपतिसूनुधाम अर्जुनाश्रमं प्रति परीति लक्षणार्थे कर्मप्रवचनीयस्य योगे द्वितीया यद्वा विभ
क्त्यर्थेऽव्ययीभावः विवर्जनार्थस्य तस्यापि विरोधात्तथा च सुरपतिसूनुधाम्नीत्यर्थः सद्यः मालतीनां जातिल
तानां सुमनामालतीजातीत्यमरः कुमुलानि समुपदधन् अनयन् विरलं यथा तथा बद्धबिंदुर्लब्धबिंदुः अपां
निपातो वृष्टिरवने सम्बन्धिनी सरजसतां सरजस्कत्वं अचतुरेत्यादिना सूत्रेण साकल्यार्थेऽव्ययीभावः समासां
तो निपातः बहुव्रीह्यर्थे स्यपलक्ष्यते अव्ययीभावदर्शनं तु प्रायिकमिति केचित् अपजहार धूलिं नाशयामासेत्य

प्रति स्मरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनां विरलमपजहार बद्धबिंदुः सरजसतामवने
रपां निपातः २० प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाशसुगंधिनानिलेन नवइव विबभौ स
चित्तजन्मा गतधृतिराकुलितश्च जीवलोकः २१

र्थः २० प्रतिदिशमिति दिशि दिशि प्रतीति प्रतिदिशं
यथार्थेऽव्ययीभावः शरत्प्रभृतित्वात्समासांतः अभिगच्छता संवाता ककुभान्यर्जुनकुसुमानि इंद्रद्रुः ककुभो
र्जुन इत्यमरः तेषां विकासेन सुगंधिना मनोज्ञगंधेन गंधस्येत्वे तदेकांतग्रहणं प्रायिकं अनिलेनाभिमृष्टः संस्पृ
ष्टः अत एव स चित्तजन्मा कामाक्रांत इत्यर्थः अत एव गतधृतिः गतधैर्यः आकुलितः क्षोभितश्च इति प्र
तीतिश्लेषः एवंभूतो जीवलोको नवइव बभौ अवस्थांतरप्राप्त्या अपूर्व इव बभौ भातिस्म इत्युत्प्रेक्षा २१ राम

व्यथितेनमिति भृशं व्यथितं दुःखितमपि मनः हरंतीकिमुतसुखितमितिभावः जंब्वाः विकारः फलं जंबु वार्हतं च फ
ले जंब्वाजंबूस्त्रीजंबुजाबवमित्यमरः लुक तद्धितलुकीतिह्रस्वः जंबुवत् फलं चेति सामान्यविशेषयोः सह निर्दे
शः यद्वाजंब्वोः फलमितिविग्रहः इकोह्रस्वोऽङ्योगालवस्येतिह्रस्वः तस्य परिणतस्योपभोगेन हृष्टा अत ए
व परभृतयुवतिः कोकिलांगनानवनवं नवप्रकारं यथातथा पोषितेन संपादितेन कंठरागेण कंठमाधुर्येण र
म्यं सौम्यमित्यर्थः स्वनं विचक्रे रवं वितेने व र्षाद्यपि मधुराः कोकिलालापा इति प्रसिद्धिः २२ अभिभवती

व्यथितमपि भृशं मनोहरंती परिणतजंबुफलोपभोगहृष्टा परभृतयुवतिः स्वनंविचक्रे न
वनवपोषितकंठरागरम्यं २२ अभिभवतिमनः कदंबवायोमदमधुरेचशिखंडिनांनिना
दे जनइवनधृतेश्चचालजिष्णुः नहिमहतांसुकरःसमाधिभंगः २३ रामकृष्णोजयः

ति कदंबवायोकदंबसंबंधिनिमारुतेमदमधुरेशिखंडिनांनिनादेचमनः अभिभवतिसति जिष्णुः जयन
शीलः अर्जुनः पृथक्जनइवधृतेः धैर्यान्न चचाल वर्षापितदुद्दीपनायनोकुरित्यर्थः हि यस्मान्महतांस
माधिभंगः सुकरोन २३ श्रीरामजयराम जयजयराम रामजयरामजयजयरामकृष्णोजयेतां

राम
८८

धूतबिसवलयेति॥ ॥बिसानि वलयानीव तेषां आवलिर्धृता यया सा कुमुदवनमेवैकं मुख्यं दुकूलमिव तद्वहं
ती। आत्तानि बाणानि नीलझिंटीकुसुमानि यया सा आत्तबाणा गृहीतनाराचा। ग[illegible]ः झीयान्तु क्षत्रियान्नारमिति
स्मरणात्‌। बाणो स्त्री नीलझिंटी द्वे तिवैजयंती। शरत्‌ वधूः जयिव घनसमयेन वर्षासमयेन वर्षाऋतुना वरेणेति शे
षः। अमलतले सरोजं पाणिरिव तस्मिन्नवलंबे जगृहे। कर्मणि लिट्‌। वधूर्वरसमागमवदृतुसंधिरेनोभेनेस

धूतबिसवलयावलिर्वहंती कुमुदवनैकदुकूलमात्तबाणा॥ शरदमलतले सरोजपाणौ घनसमयेन वधूरिवा
ललंबे॥२६॥ समदशिखिरुतानि हंसनादैः कुमुदवनानि कदंबपुष्पवृष्ट्या॥ श्रियमतिशयिनीं समेत्य जग्मु
र्गुणमहतां महते गुणाय योगः॥२७

र्थः। अत्रात्तबाणेति झिंटीनाराचयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिरू
पमागमित्यनयोः संकरः॥२४॥ अथ ऋतुसंबंधिं वर्णयति॥ ॥समदेति॥ ॥समदशिखिरुतानि मत्तमयूरकूजिता
नि हंसनादैः समेत्य तथा कुसुमवनानि कदंबपुष्पवृष्ट्या समेत्यानिशायिनीमतिशयवतीं श्रियं जग्मुः॥ तथा हि॥
गुणमहतां गुणाधिकानां योगः परस्परसमागमो महते गुणाय उत्कर्षाय भवतीति शेषः॥ अत्र त्रिपद्यां समालंकारः॥
तासमालंकृतिर्योग्यवस्तुनोरुभयोरिति लक्षणात्‌। सोऽपि च तुर्थेन अर्थांतरन्यासेन स्वसमर्पकेनांगांगीभावेन संकरः॥२७॥

सरजसमिति। ।प्रियमधुरिष्टमकरंदः। अनित्यत्वान्नसमासांतः पुल्लिंगोत्तरपदो बकुव्रीहिरिति केचित्। नपुंसकलिंगस्यैवमधुनो हृस्यारंभ्रमन्निपाठान्मकरंदस्य माक्षिकस्यापि वाचकः। अर्द्धर्चादिगणपाठान् पुंनपुंसकयोर्मधुः षट्पदावलिः। उपांतिके यानि नीपानि कदंबकुसुमानि तेषां रेणुभिः कीर्णव्याप्तं। किंतु स्वतो पि सहरजसा सरजसं न तु रजस्कमिति भावः। साकल्ये व्ययीभावः। अचतुरेत्यादिना निपातः। केतकीनां प्रसवं अपहाय विनीलवंधनानि मालिनयंती नितिअसना। भनि प्रियककुसुष्पाणि मकरंदभरितानीति भावः। सर्जकासनबंधूकपुष्पप्रियकजीवकादुत्यमरः।

सरजसमपहाय केतकीनां प्रसवमुपांतिकनीपरेणुकीर्णं॥ प्रियमधुरसनानि षट्पदालि
र्मलिनयति स्म विनीलबंधनानि॥२६॥ मुकुलितमतिशय्य बंधुजीवं धृतजललबिंदुषु
शाड्वलस्थलीषु॥ अविरलवपुषः सुरेंद्रगोपा विकचपलाशचयश्रियं समीयुः॥२७॥

मलिनयति स्म। यथार्थेनान्यत्र मालिन्यं स्यात् तथा मधुलोभात् आच्छादयामासेत्यर्थः। न हि मध्वासक्तो मधुलाभे मतिकनिष्ठेषु आसजतीति भावः॥२६॥ ।मुकुलितमिति। धृताजललबिंदवो यासु तासु शाड्वलस्थलीषु। शाड्वलः शाद्हरितेत्यमरः। शाद्हरितप्रदेशेषु अविरलवपुषः स्थूलमूर्त्तयः सुरेंद्रगोपाः। मुकुलितं मुकुलीकृतं बंधुजीवं। बंधुजीवकमुकुलमित्यर्थः। बंधुको बंधुजीवक इत्यमरः। अतिशय्य अतिक्रम्य विकचपलाशचयश्रियं विकचकिंशुकराशिशोभां। पलाशो किंशुकः पर्णइत्यमरः। तत्सदृशां श्रियमित्यर्थः। अतएव निदर्शनालंकारः। समीयुः प्रापुः।२७।

अथहेमंतमाह॥ ॥अविरलेति॥अविरलानि घनानि फलिनीवो नानां प्रियंगुवनानां प्रसूनानि यस्मिन्सः॥प्रियंगुः फलिनी फलीत्यमरः॥
कुसुमितैः कुंदैर्माघ्यकुसुमैः सुगंधिः गंधवाहो यस्मिन्सः॥माघ्यं कुंदमित्यमरः॥शिशिराणामपि कुंदानां हेमंते प्रादुर्भावादविरोधः॥
विरलतुषारकणः॥इति प्रारंभोक्तिः॥तुषारकाले हेमंतः चिराय असमयजं अकालसंभवं गुणं उत्कर्षं लेभे॥२८॥निचयिनीति॥नि
चयिनि उपचयवंति लवलीलतानां विकासे पुष्पविजृंभणे तथा लोध्रसमीरणे च हर्षमुत्कंठां विदधति सति जनयति सति पांडुसूनु
र्जुनः विकृतिं नोपययौ॥कुतो हि यस्मात् जिगीषतां जेतुमिच्छतां चेतो नयात् नीतेः न चलति॥नहि क्रोधाक्रांते चेतसि शृंगारस्यावका

अविरलफलिनीवनप्रसूनः कुसुमितकुंदसुगंधिगंधवाहः॥गुणमसमयजं चिराय लेभे विरलतुषारकणः तुषारकालः॥२८॥
निचयिनि लवलीलताविकासे विदधति लोध्रसमीरणे च हर्षं॥विकृतिमुपययौ न पांडुसूनुश्चलति नयान्न जिगीषतां हि चेतः॥२९॥
कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिंधुवारः॥सुरभिमुखहिमागमांतशंसी समुपययौ शिशिरः स्मरैकबंधुः॥३०॥रा

शः तद्विरोधित्वाच्छृंगारस्येति भावः॥२९॥कतिपयेति॥कतिपयैरेव सहकारपुष्पैराम्रकुसुमैः रम्यः ननु वसंतवत्सर्वमंगैर्वापि हेमंतवद्बहिर
हितैरिति भावः॥तनुतुहिनः॥तनु हेमंतवद्बहु तुहिनो नापि वसंतवद्विरलतुहिन इति भावः॥अल्पानि कतिपयानि विनिद्राणि विकसिता
नि सिंधुवाराणि निर्गुंडीकुसुमानि यस्मिन्सः॥अत्रापि सहकारवदभिप्रायो द्रष्टव्यः॥सिंधुवारेंद्रसुरसो निर्गुंडींद्राणिकेत्यमरः॥इ
खं सुरभिमुखं वसंतप्रारंभं हिमागमांतं हेमंतावसानं च शंसति सूचयतीति तथोक्तः॥स्मरैकबंधुः स्मरसहकारी उभयर्तुधर्म
संपत्तेरिति भावः॥शिशिरः समुपययौ॥३०॥श्रीगणेशाय नमो नमः॥श्रीरामचंद्राभ्यां नमो नमः॥श्रीसरस्वत्यै नमो नमः।

अथ वसंतारंभमाह ॥ कुसुमेति । कुसुमप्रधानास्तरवो वृक्षास्तेषां वनानि उपैतुं आरोढुं कामो यस्याः सा । लुंपेदवश्य
मः कृत्ये तुं काममनसोरपीति मकारलोपः । वसंतलक्ष्मीः । किसलयिनी पल्लविनी चूतयष्टिं चूततरुशाखामेवेति भावः । अव
लंब्यावष्टभ्य । अन्यथा आरोढुमनुपायत्वादिति भावः । क्वणत् सिंजितं अलिकुलं नूपुरमिव यस्याः सा तथोक्ता सती । अलि
कुलवन्नूपुरमन्यत्र । नलिनवनेषु पदं निरासे । निदधे । तेषु प्रथमं प्रादुरासीदित्यर्थः । उपसर्गादस्यत्यूह्योर्वेति वच
षनादात्मनेपदं । अत्र प्रकृतवसंतलक्ष्मीविशेषणसाम्यादप्रस्तुतनायिकाव्यवहारसमारोपात्समासोक्तिरलंकारः ॥ ३१ ॥

कुसुमतरुवनान्युपैतुकामा किसलयिनीमवलंब्य चूतयष्टिं ॥ क्वणदलिकुलनूपुरं निरासे नलिनवनेषु
पदं वसंतलक्ष्मीः ॥ ३१ ॥ विकसितकुसुमाधरं वहंती कुरबकराजिवधूं विलोकयंतं ॥ ददृशुरिव सुरांगना
निषण्णं सशरमनंगमशोकपल्लवेषु ॥ ३२ ॥

। विकसितेति । विकसितो विश्लिष्टः कुसुममेव अधरो यस्मिन्कर्म
यमानो णि यथा भवति तथा हसंतीं सकुरबकराजिरेव वधूस्तां विलोकयंतमिति भावः । कामुकनयेति भावः । अतएव अ
शोकपल्लवेषु निषण्णं पल्लवसंस्तरे स्थितमित्यर्थः । रिरंसयेति शेषः । सशरं नित्यं विजयित्वादिति भावः । इत्थं शृंगा
रवीरयोरेकाधिकरणभूतमनंगं सुरांगनाः ददृशुरिव साक्षात्प्रत्यक्षं दृष्टवत्य इवेत्युत्प्रेक्षा । अशोकावलोकनान्मदनसाक्षात्का
रादिव महान्मनसः क्षोभस्तासामासीदित्यर्थः । अत्र रूपकोत्प्रेक्षयोः संसृष्टिः ॥ ३२ ॥ श्रीगणाधिपतये नमो नमः ॥

मुकुरिति ॥ अनुपतता अनुधावता दक्षिणानिलेन मलयमारुतेन मुहुः विधूयमानं कंपितमत एव विरचिता संहतिर्येन ततं संभूतमि
त्यर्थः ॥ पंकजिन्याः यन्नलिनमुखमिव तत्स्यां न विसर्पि प्रांत चारि अलिकुलं कर्त्तृ ॥ अलकाकृतिं अलकसादृश्यं प्रपेदिरे ॥ ३३ ॥
श्वसनेति ॥ षट्पदेन अलिना आलललतासर्जतरू आरवाव धूः रिव इति आलललताव धूः ॥ प्राकारावरणः आलः तूणलः सर्जतरु
स्मतद्गति विश्वः ॥ श्वसनेन वायुना निश्वासेन च चलितः पल्लवो अधरोष्ठ इव ज अधरोष्ठ पल्लवो यस्मिन्सः ॥ अत्रोष्ठयोः समासे वा
पररूपं वक्तव्यं ॥ मधुना मकरंदेन मद्येन च स्फुरभिणि पुष्पमुखे इव नवं यथा तथा विहितं षट्कृतं कोपमिवेति क्रिया विशेषणं

मुकुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन ॥ अलिकुलमलकाकृतिं प्रपेदे नलिनमुखांत विसर्पि पंकजिन्याः ॥
॥ ३३ ॥ श्वसनचलितपल्लवाधरोष्ठी नवनिहितेर्ष्यमिवावधूनयंती ॥ मधुसुरभिणि षट्पदेन पुष्पमुखइव बाललतावधू
श्चुचुंबे ॥ ३४ ॥ प्रभवति न तदा परो विजेतुं भवति जितेंद्रियता यदात्मरक्षा ॥ अवजितभुवनस्तथा हि लेभे सिततुरगे विजयं न पुष्पमासः ॥ ३५ ॥

यथा ऽवधूनयंती कंपयंती ॥ घञ् प्रिणोर्नुवक्तव्यः इति नुमागमः ॥ चुचुंबे चुंबिता ॥ अत्र श्वसनत्राष्ट्रार्थयोर्मधुनूणक्रार्थयोश्च भेदाध्य
वसाय श्लेष मूला अतिशयोक्तिः ॥ स च उपमांगमित्यनयोः संकरः ॥ ३४ ॥ प्रभवतीति ॥ परः शत्रुः तदात स्मिन्काले विजेतुं न प्रभ
वति न शक्नोतीत्यर्थः यदा जितेंद्रियता इंद्रियजयत्वं आत्मरक्षा भवति विद्योततेः ॥ तथा हि ॥ अवजितभुवनस्त्रैलोक्यविजयी पुष्पमासो व
संतः सिततुरगे अर्जुनविषये विजयं न लेभे ॥ अतो जितेंद्रियता दुर्जयेत्यर्थः ॥ विशेषणसामान्यसमर्थनरूपोऽर्थांतरन्यासः ॥ ३५ ॥
अथ ग्रीष्मं वर्णयति ॥ कथमिति ॥ विकचितमल्लिका विकासो निदाघकालो ग्रीष्मः ॥ ऋतुभिः वर्षादिभिः समं मुनिना अर्क
धीरितस्य निरस्कृतस्य तव संमतिः लोके योग्यत्वेन अनुमतिः कथमिव कथंचित् भवित्री न भविष्यतीत्यर्थः ॥ इतीत्थं मधुर्वसंतः ॥

चैत्रे दैत्येव वसंते च जीवानो लोके मधुस्मृत इति विश्वः॥ स्मयते स्मेव॥ जहास किमिवेत्युत्प्रेक्षा॥ टल स्मेति भूतार्थे लट्॥ प्रहासेन शुभ्र
त्वेन कविप्रसिद्धिः॥ मल्लिका विकासे हासत्वाध्यवसायः॥ अत्र चतुर्भिः समम् अवधीरितस्येत्यत्राभेदाध्यवसायमूलो सहोक्तिर
लंकारः॥ संभवत्येव भेदभिन्नत्वस्याप्यवधीरणस्याभिन्नतयाध्यवसायात् तदेव अवधीरणासं मति हूरा स्मयोत्प्रेक्षा मिथ्यन
योरंगांगीभावेन संकरः॥३६॥ बलवदिति॥ बलवत्प्रबलम् अपि मिथो विरोधि परस्परस्पर्द्धि बलं सैन्यं॥ वरूथिनी बलं सैन्यमित्यमरः॥

कथमपि तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य॥ इति विरचितमल्लिकाविकासः स्मयते स्म
मधुं निदाघकालः॥३६॥ बलवदपि बलं मिथो विरोधि प्रभवति नैव विपक्षनिर्जयाय॥ भुवनपरिभ
वीनयत्तदानीं तमृतुगणः क्षणमुन्मनीचकार॥३७॥ श्रीगणाधिपतये नमो नमः प्रसंनोस्तु वरदोस्तु

विपक्षनिर्जयाय शत्रुविजयाय॥ शत्रून् जेतुमित्यर्थः॥ न प्रभवति न शक्नोत्येव॥ तुमर्थयोगे चतुर्थी॥ कुतो यस्मात्कारणाद्भुवनानां परिभवी जे
तापि॥ जिदृक्षीत्यादिना इनिप्रत्ययः॥ ऋतुगणस्तदानीं तम् अर्जुनं क्षणम् अपि नोन्मनी चकार॥ अनुन्मनसं उत्सुकमानसम् इत्यर्थः॥ न चका
र॥ अनुन्मनस्यक्षुरित्यादिना अभूततद्भावे च्विः॥ सलोपश्च॥ विरोधिसामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥३७॥ श्री चंद्रलाभसन्न

राम
९४

६ तथा च सूत्रं ॥ विरूपकार्यानर्थयोरुत्पत्तिरूपसंघट्टनाद्विषमालंकृतिरिति ॥ ६

एवं तदुत्कोद्दीपनसामग्री विफला जातेत्युक्तं संप्रति विपरीतां चेत्याह ॥ ॥श्रुतीति ॥ ॥सहायैस्तासां सहचरैः गंधर्वैः कृतमिति तृषः ॥ न लोके त्या
दिना षष्ठीसमासप्रतिषेधः ॥ कर्त्तरि तृतीया ॥ श्रुतिमुखं श्रोत्रमधुरं उपवीणितं वीणया उपगानं सत्यापपाशेत्यादिना वीणाना (?) शब्दस्तावत्कः ॥
अविरलैर्भूयोभिः लांछनैः पूर्वोक्तैः फलकुसुमादिभिः चिह्नैः हारिणो मनोहराः कालावसंतादयो ऋतवो अविहिताः कृता हरिसूनोरर्जुन
स्य विक्रिया मनोविकृतिर्यस्तानि तथाभूतानि संति ॥ अत एव नपुंसकमनपुंसकेत्यादिना नपुंसकैकत्रोषः ॥ त्रिदशवधूषु मनोभवं वि
न तेनुः विस्तारयामासुः ॥ सोयं परप्रहारार्थमुद्युमितं स्वायुधं स्वात्मानमेव प्रहरतीति न्याय एव तूजोदिति भावः ॥ अत्र मुनिविक्रियार्थस्त्रीणां
विक्रियारूपानर्थोत्पत्तिकथनात् द्वितीयो विषमालंकारः ॥ ३८ ॥ तदस्त्ववश्यं लंबनगुणोपि विपरीताभूदित्तिस्लोकद्वयेनाह ॥ नदलतीति ॥

श्रुतिसुखमुपवीणितं सहायैरविरललांछनहारिणश्च कालाः ॥ अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं विते
नुः ॥ ३८ ॥ नदलतिनिचयेन तथास्य लाना न च विषमच्छदकुसुमयूथिकास्म ॥ अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥ ३९
मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन ॥ मदनमुपदधे स एव तासां दुरधिगमा हि गतिः प्रयोजनानां ॥ ४० ॥
आसां लोचनानि हरितनयावयवेषु यथा ॥ तथा दलति विकसति उत्पलानां निचये अभिरतिं नोपलेभिरे न प्रापुः ॥ न चापि विषमच्छदाः गुच्छाः
उपथमनः संगसूचयति ॥ मुनिमिति ॥ याः स्त्रियः कमनीयता सौंदर्यमेव गुणस्तेन मुनिं अर्जुनं अभिमुखतां वश्यतां निनीषवो नेतु
मिच्छवः समुपययुः ॥ तासु स मुनिरेव मदनमुपदधे ॥ जनयामास ॥ तथा हि ॥ प्रयोजनानां उद्देश्यानां गतिः परिणतिः दुरधिग
मा दुर्ज्ञेया खलु ॥ अतः क्वचिद्भवति क्वचिन्न भवतीति भावः ॥ ४० ॥ श्रीरामकृष्णो जयतां ॥ श्रीलक्ष्मीवेंकटेशाय नमो नमः ॥

अथ आसां अनुरागमेव कार्यतः प्रपंचयति ॥ प्रकृतमिति ॥ विलासिसविलासं नर्त्तकीनां संबंधि ॥ त्रिभिर्मिथुन प्रत्ययः ॥ मुनि
वेरगवनिभ्य एवं तिनियमः ॥ चक्षुः कर्तृ ॥ प्रकृतं प्रक्रांतं अभिनेयं अभिनेतव्यं रसभावादिव्यंजकं नानुससार ॥ तत्तु दूषणं यतः
नटानां गुण्येनैव दृष्टिप्रयोगनियमादिति भावः ॥ तथा प्रविकसदंगुलिवत्प्रयोज्य हस्तानुसारेण प्रचलदंगुलिकं तं सप॰ पाणि
पल्लवं नानुससार ॥ सच दोषः ॥ यतो हस्तस्ततो दृष्टिरिति नियमात् इति भावः ॥ पल्लवो स्त्री त्यमरः ॥ वास्या हि कु त्ये
पमेयोरे वार्थे पि समुच्चय इति विश्वः ॥ किंतु प्रथमं प्रवेश एव सितं तुरंगे उपहितं दत्तं सन्न चचाल ॥ तत्रैव लग्नं तस्थौ रागा

प्रकृतमनुससार नाभिनेयं प्रविकसदंगुलिपाणिपल्लवं वा ॥ प्रथममुपहितं विलासि
चक्षुः सिततुरगे न चचाल नर्तकीनां ॥ ४१ ॥ अभिनयमनसः सुरांगनाया निहितमल
क्तकवर्तनाभिताम्रं ॥ चरणमभिपपात षट्पदाली धृतनवलोहितपंकजाभिशंका ॥

त्तैर्न किं चित्करणीयमनुसंधेयमिति भावः ॥ ४१ ॥ अभिनयेति ॥ अभिनयो रसभावादिव्यंजकः चेष्टाविशेषः तत्र व्यंजकाभि
नयो समाविष्टमनः ॥ तस्मिन्मनो यस्यास्तस्या व्यासंगाद्भृंगापातमजानंत्या इत्यर्थः ॥ सुरांगनायाः संबंधि अलक्तकवर्तनया लाक्षारंजने
नि नअभिताम्रं निहितं न्यस्तं चरणं षट्पदाली कर्त्री धृतनवलोहितपंकजाभिशंका प्रत्यग्रकोकनदभ्रमो ययासा अभिपपात धा
वतिस्म ॥ अत्र षट्पदावल्याः स्त्रीचरणपंकजभ्रमाभिधानाद्भ्रांतिमदलंकारः ॥ तेन चोपमाव्यंजनतद्रूपलंकारध्वनिः ॥ ४२ ॥

अविरलमिति ॥ नमितन्निशिखानि नर्त्तकीपादयोऽनाल्लमिनाग्नाणिकदंबकेसराणि रंगपूजादत्तानीतिशेषः ॥ अविरलं सं
द्रुतनः रागोष्मणा विलीनो । न एव परिषिक्तः प्रसरत स्तद्रुतपरिषिक्तं नर्त्तकीनां अलसेषु पदेषु पादन्यासेषु अलक्तकं ला
क्षारागं सवपुषं मूर्तिमंतं चित्तरागं उत्कटं कायाद्बहिर्निस्सृतं मुनिविषयिणं अनुरागमिव तत्र्य रेक्षा ॥ उद्गुर्वहिं निस्म ॥ ५३ ॥
अथासां अप्सरसां गोपांकथयति ॥ ॥ नृपेति ॥ नृपसूनं अर्जुनं अभितः परिजनस्य सखीजनस्य गात्रेणा तिरोहितालज्ज
यास्याकारगोपनयांतर्हिता अंगयष्टिर्यस्याः समन्मथायाः ॥ वध्वाः अभिलषितं मुनिं प्रत्यनुरागः स्फुटं बभूव ॥ नचसं
व्रीयमानस्या भिव्यक्तिर्विरुद्धेति वाच्यमित्याह ॥ यत्नः संवृतिः सम्यग्गोपनमेव कामिनानि अनुरागानुकाम्येति भावः ॥

अविरलमलसेषु नर्त्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु ॥ सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदंबकेसराणि ५३
नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहितांगयष्टेः ॥ स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि ५४
अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ॥ चकितमवसनोरु सत्रपायाः प्रतियुवतीर्विस्मयं निनाय ॥ ५५ ॥

वदति ॥ प्रकटयतीत्यर्थः ॥ अयमनुरागस्य स्वभाव उक्तः ॥ यया चेष्टया संव्रीयते सैवास्य प्रकाशिका जातेति भावः ॥ ५४ ॥ अभीति ॥ अभिमुनि
मुनिसमक्षं घनेन मरुता जघनांशुकैकदेशे सहसा हृते सति सत्रपायाः अपरस्याः संबंधि अवसनो निरावरणो ऊरू यस्मिन् तत् चकि
तं भयं संभ्रमः प्रतियुवतीः सपत्नीः विविस्मयं निनाय किमुतान्यजनमिति अपि शब्दार्थः ॥ न तु मुनिमिति भावः ॥ ५५ ॥ रामक
॥ श्री ॥ राजद्वारि गलद्भूरिपतद्भिज्जिमनेस्तुनि ॥ राजपुत्रस्य पुत्रो भून्नाम्नाकं तु हडिंबकः ॥ १ ॥ श्री व्यंकटेशायनमो नमः ॥

ध्यत्तेति॥अपरास्त्रीस्मराभितापाद्धेतोः धृतानिबिन्येवलयानियेनसः तस्मिन्पाणौअधिरूषितैश्चंदनचर्चितैर्पांडुगंडस्थलेरवंयस्यतन्मु
रवंनिधायआरोप्यामधुमदेमधुदरहितेनथाप्यलसल्लोचनेयस्मिन्कर्मणियथानथात्तंनृपसुतंनिदध्यौपेन्वयतिस्म॥निर्वर्ण
नंतुनिध्यानंदर्शनालोकनेक्षणमित्यमरः॥४६॥अथपंचभिःश्लोकैर्मुनिंप्रतिदूतिवाक्यमाह॥सखीति॥हेमुनेत्वदुपकंठेत्व
त्समीपंसासखीमांप्रहितवतीतिभणितेतिशेषः॥किंलक्षणा॥कुसुमेषुणाकामेनाभितप्तापीडितारतिभेणितेतिहेसखि
दयितंवल्लभंमनोहृद्यमुनिंदूहानयमांप्रापयेत्यर्थः॥किंलविमन्यकारिणींयंनायिकेत्याह॥हृदयमिति॥अहृदयाअमनस्का
तस्यत्वद्गतत्वादितिभावः॥यतःकारणात्सापूर्वंप्रागेवहृदयंमनःभवदुपकंठंत्वत्समीपमुपागतंनविवेदनाम अतःमत्प्रेषणंव्यर्थं॥
धृतबिसवलयेनिधायपाणौमुखमधिरूषितपांडुगंडलेखं॥नृपसुतमपरास्मराभितापादमधुमदालसलोचनंनिदध्यौ॥४५॥
सखिदयितमिहानयेतिसामांप्रहितवतीकुसुमेषुणाभितप्ता॥हृदयमहृदयानामपूर्वंभवदुपकंठमुपागतंविवेद॥४६॥चिर
मपिकलितान्यपारयंत्यापरिगदितुंपरिशुष्यतामुखेन॥गतघृणगमितानिसत्सखीनांनयनयुगैःसममार्द्रतांमनांसि॥४७॥राम
तस्यांतरंगत्वाद्बहिरंगस्यदुर्बलत्वादितिभावः॥एतेनमनःसंगउक्तः॥चक्षुःप्रीतिस्तुप्रागेवसर्वासामुक्तेतिनपृथगुच्यते॥४७॥
द्दष्टिमनःसंगसंकल्पोजागरःकृशतारतिः॥ह्रीत्यागोन्मादमूर्छानाइत्यनंगदशादशेति॥तत्राद्यवस्थाद्वयमभ्यधायिअथका
र्श्यंक्रमेणेरपेक्ष्येणसूचयति॥चिरमपीति॥हेमुनेहेगतघृणसत्सखीनामनांसिनयनयुगैःसमंसाकंआर्द्रतांक्लिन्नत्वंगमिता
निउपचयंगमितानिप्रापितानीतिभावः॥शोकेबाष्पैरितिभावः॥परिशुष्यताशोषंगच्छतामुखेननिजागरोक्तिः॥चिरंकलितान्यपि
संदेशार्थंबुध्यायोजितान्यपिवचनानीतिशेषः॥परिगदितुमपारयंत्याअशक्नुवंत्यानयाहेगतघृणआर्द्रापितानांनानुकंपय
सइतिभावः॥गताघृणादयायस्मात्सः॥कृपाघृणादयेतिपर्यायः॥अथसखीश्लोकोनत्याम्मूर्छावस्थासूच्यते॥अत्रश्लोकबाष्परूपकरणभेद

अचकमेनि। मांद्वी स्मरभिश्च यानां मदुस्करभिं पुष्पन्नाप्यां विरहय्य विहाय सपल्लवां धरित्रीं अचकमत ऐछत न स्याः
स्वनो पि श्रीनत्स्लत्वादिति भावः। कमेर्ण्यन्ताल्लुङि णिश्रिद्रुस्रुभ्यः कर्त्तरि चंङ् चङीति द्विर्भावः। रचीकमतेति प्रसंग
त्। अतो णिङभावपक्षे कमेश्चूश्चङ् वक्तव्य इति अचकमतेति रूपं॥ अस्याः नायिकायास्तत्र धरित्र्यां अपि भृं
अरतिं दुःखं अवाप्य स्मरयती निस्रखः श्रीतलम्प्रयस्तं सुखश्रीतलं उत्संगं उपैतुमिछावर्त्तन इति शेषः। अस्या

अचकमत सपल्लवां धरित्रीं मदुस्करभिं विरहय्य पुष्पन्नाप्यां॥
भृङ्गामरतिमवाप्य तत्र चास्यास्तव सुखश्रीतमुपैतुमकमिछा॥ ४९॥

श्चोत्स्मकथं कथितं। अत्रारतिजागरोत्सुक्यश्लोक इति। अस्याः नायिकायाः क्रमेपुणपुष्पन्नाप्यार्द्यनेकाधारसंबं
धकथनात्प्रथमः पर्यायालंकारः। तदुक्तं॥ क्रमेणैकमनेकस्मिन्नाधारेवर्त्ततेयदि। एकस्मिन्नथवानेकं पर्या
यालंकृतिर्द्विधेति लक्षणात्॥ ४९। ।७॥ मूकं करोति वाचालं पंगूं लंघयते गिरिं॥ यत्कृपा तमहं वंदे परमानं
दमाधव॥ १॥ श्रीगुरुचरणारविंदाभ्यां नमो नमः॥ विश्वेश्वरायनमोनमः॥ श्रीलक्ष्मी व्यंकटेशायनमः॥

तदित्ति। तत्तस्मात्कारणात्तस्याः दुःखवस्थत्वात्त्वं हे अनघ निःपाप तनुः कृशेति कार्श्यावस्थासूचिता। सानायिकासकामास्त सफलमनोरथास्त हि यस्मात्त्वमेवार्थः प्रयोजनं वस्तु वा तस्मिन् त्वदर्थे निमित्ते सती त्तिनोषः।
त्वामुद्दिश्येत्यर्थः। परासुर्गतनिःप्राणत्वं पुरा व्रजति गमिष्यति मरिष्यतीत्यर्थः। तथा च तन्निमित्तहत्यया अनघत्वव्याघातस्यादिति भावः। यावत्पुरानिपातयोः लट् इति भविष्यदर्थे लट्। इदं च वदन्त्राभावस्थाप्रदर्शनं। न

तदनघ तनुरस्त सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे॥ पुनरपि सुलभं तपोनुरागी युवतिजनः खलु नाथ्यतेनुरूपः॥ ५०॥ श्रीरामचंद्राय नमः

च तपो निष्ठत्वादेनत्वयमित्याह। पुनरपीति। पुनरपि पश्चादपि। पुनरप्रथमे भेद इति विश्वः। तपः सुलभं अनुरागी अनुरूपः योग्यश्च युवतिजनः नाप्यते खलु। ५०॥ श्रीरामचंद्राभ्यां नमो नमः। श्रीचंद्रलाबायेन मो नमः।
अत्रांतरे च कुलया कुलव त्सपातसंजातपातकश्च स्फुट लांछनश्रीः। वृंदावनांतरमदीपयदंशुजालैर्दिक्सुंदरी वदनचंदनबिंदुरिंदुः॥ १॥

राम
९२

एवं प्रश्लोभितस्यापि मुनेर्मौनेनं न भग्नमित्याह। जहिहीति। कठिनतां निःस्पृहत्वं जहिहि त्यजेत्यर्थः। जाहत्तेराजहाविती कारः। वाचं प्रयच्छ संभाषस्वेत्यर्थः। मुनीनां मानसं करुणामृदु ननु दयार्द्रं खलु। किं चाभग्याः निर्भग्याः उपगतं प्राप्तं विषयमिति निर्घोषः। अवधीरयंती अवमन्यंते एवमुक्तप्रकारेण सो जुनिः कयाचिदेत्य समीपमागत्य निपुणं चतुरं यथा तथा चोक्तः। अत्र पंचश्लोक्यां विप्रलंभशृंगारस्योत्सृष्टस्य नाम्नो व्यभिचाराभावस्य

जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनां॥ उपनतमवधीरयंत्यभग्याः स निपुणमेत्य कयाचिदेव मूचे॥ ५१॥ श्रीराम राम राम रामर।

वा पुनरुक्तिः। अनौचित्येन नायिकायाः प्रवृत्तेरसाभासत्वमनुसंधेयं। तदुक्तं। एकत्वेनानुरागस्य श्च तिर्यङ्म्लेच्छगतोपि वा योषितां बहुसक्ति श्च रसाभासस्त्रिधामतइ तित न्निबंधनात् प्रायउर्जस्वलमलंकारः। तथा च सूत्रं। रसभेदतदाभासतत्प्रशमानां निबंधने तूर्जस्वलालंकारः। से मो हि तानि सबंधेरसवदलंकारः। भावनिबंधे प्रयोगालंकारः। सरसभावनिबंधेपि ऊर्जस्वलालंकारः। प्रशमनिबंधे समाहितालंकारः इति सूत्रार्थः। ५१। श्रीराम २३

त्रीन
५५

सललितेति। सललितं सविलासं यथा तथा चलितेन विवर्त्तनेन त्रिकेण कटिभागेन अभिरामा। विरसिजा
नाः सप्तम्यां जनेर्डः। अमूर्द्धमस्तकात् स्वांगात् कामइत्यलुक्। उपपदमतिङ् इति समासः। एतेन मनसिजो व्या
ख्यातः। तेषां संयमने बंधने आकुलो व्यग्रः एकः पाणिर्यस्याः सा अपरा स्त्री सुरपतितनये अर्जुने जैत्रे
व जैत्रः। जेतृशब्दात् तृन्नन्तात् प्रज्ञादिभ्यश्चेति अण् प्रत्ययः। मनसिजस्य जैत्रः शरः। तं तथाभूतं विलो
चनार्द्धं एकदेशं कटाक्षमित्यर्थः। निरासे विससर्ज। ५२। कुसुमितमिति। इभकुंभवत् पृथुभ्यां स्तनाभ्यां आ

कुलकं। सललितवलितत्रिकाभिरामा विरसिजसंयमनाकुलैकपाणिः। सुरपतितनये परा निरासे
मनसिजजैत्रशरं विलोचनार्द्धं।।५२।। कुसुमितमवलंब्य चूतमुच्चैस्तनुरिभकुंभपृथुस्तनानतांगी।
तदभिमुखमनंगचापयष्टिविसृतगुणेव समुन्ननाम काचित्।। ५३।। श्री रामकृष्णाभ्यां नमः। आन-
नतं गें अंगं यस्याः सा अंगगात्रकंठे भ्यः स्वे नि ङीप्। काचित्तनुः तन्वी। वोतो गुणवचनात् इति ङीप् विकल्पः।
कुसुमानि संजातानि यस्य सः कुसुमितः। उच्चैरुन्नतं चूतं अवलंब्यात एव चूतलताया गाढं स्मृतो गुणो
ज्या विसृतं विस्तृतं नतं। मौर्वी ज्या सिंजिनी गुण इत्यमरः। अनंगचापयष्टिरिव आकृष्टमुक्तेति भावः।
तदभिमुखं समुन्ननाम समुज्जृंभे। अंगभंगं चकारेत्यर्थः। ५३। श्री गणाधिपतये नमो नमः प्रसन्न

सरभसमिति। अन्या विगलितनीवि श्लथबंधनं अत एव विलोलं स्थानचलितं। नील्यारक्ते नीलं। नील्याञ्
नवक्के यद्वात्यन्त्रत्ययः। अंतरीयं परिधानीयं अवलंब्य हस्तेन गृहीत्वा सरभसं सत्वरं अभिपतितुं मनोऽय
स्याः सा तथोक्ता गंतुमुद्युक्तेत्यर्थः। तथापि ससाध्वसेव न तु वस्तुतः साध्वसा किंतु च्युतेन गलितेन रसना
गुणेन संयता बद्धा सती अवतस्थे स्थिता। बंधसंदानितं मूतं मुद्रितं संहितं सितमित्यमरः। अतः कर्मणि क्तः।
च्युति स्पतिं मास्थामिति कितीकरः।५४। कांचिदाह। यदीत्यादि। तव मनसि शमः शांतिर्यदि अस्ति

सरभसमवलंब्य नीलमन्या विगलितनीवि विलोलमंतरीयं॥ अभिपतितुमनाः ससाध्वसेव च्युत
रसनागुणसंधितावतस्थे॥५४॥ यदि मनसि शमः किमंग चापं शठ विषयास्तव वल्लभा न मुक्तिः॥
भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशं॥५५॥

तर्हि दोषः। भो अंग चापं किं किमर्थमित्यर्थः। हे शठ तव विषयाः शब्दादयः वल्लभाः प्रियाः न मुक्तिः। तदेव द्रढयि
तुमाह। भवतु को दोष इति दोषः। यदि अहं रागी तर्हि किमिति भवतीर्न गणयामीति तत्रां को वारयति। दिश
तीति। ते हृदये मनसि हृदयेश्वरा कांचित्तव प्रेयसी अन्यकामिनीभ्यः स्त्र्यंतरेभ्यः अवकाशं न दिशति
न प्रयच्छति स्त्र्यंतरासक्तया नास्मान् गणयसि न तु वैराग्यात्तदर्थमेवायं ते सकलप्रयासोऽपीत्यर्थः।५५।

इतीति। इति इत्थं असूयया मत्सरेण स्फुरन्नधरोष्ठो यस्मिन्कर्मणि यथा तथा अभिधाय विषमितचक्षुषा कु
टिलीकृतदृष्ट्या अगणिताः गुरवः आचार्यादयः मानाभिमानो अभिमानो लज्जा च यया तया कयाचित् असौ
मुनिः उरसि स्वयं स्वहस्तेनैव श्रवणोत्पलेन जघ्ने हतः। ५६। सविनयमिति। अपरा सविनयमनौद्धत्य
न साचि तिर्यग् अभिसृत्य समीपं गत्वा स्मितेन मंदहासेन सुभगा एकस्य लसतः कपोलस्थलक्ष्म्या यस्याः

इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूयया कयाचित्॥ अगणितगुरुमा
नलज्जयासौ स्वयमुरसि श्रवणोत्पलेन जघ्ने॥ ५६॥ युग्मं॥ सविनयमपराभि
सृत्य साचिस्मितसुभगैकलसत्कपोललक्ष्मीः। श्रवणनियमितेन नं निर्दध्यौ सकलमिवी

सेति। बहुव्रचनोत्तरो बहुव्रीहिः। अन्यथा कप्रत्ययः इत्युक्तं प्राक्। श्रवणनियमितेन कर्णान्तिकं प्रापितेन नता
वदायतेनेत्यर्थः। असकलेनासंपूर्णेन कटाक्षेणेति यावत्। असमग्रप्रसारेण लोचनेन तं मुनिं सक
लमिव समग्रप्रायं यथा तथा निर्दध्यौ पश्यति स्म कटाक्षेणैव गाढमद्राक्षीदित्यर्थः। एतेषु लोकेषु भावा
भासनिबंधनाद् ऊर्जस्विलालंकारः। अतो व्ययमत्र भावः। आभासत्वं चास्य विरक्ते मुनावनौचित्यादित्युक्तं प्राकू।

अथासां मुनिविलोभनमुपसंहरति। करुणमिति। ताभिः स्त्रीभिः तदभिमुखं मुनिसमक्षं करुणं दीनं अभिहितं उक्तं त्रपा निरस्ता त्यक्ता किं बहुना अश्रु च विमुक्तं। अतः परं किंचिद्विधेयं नास्तीत्यर्थः। कुतो हि यस्मात् अबलाजनस्याभिसारणे समागमविषये प्रकुपितं अननुकूलं प्रियं अनुनेतुं अनुकूलयितुं इयती भूमिः इत्येतावती सीमा समाधानानां परमावधिरिति यावत्। अर्थांतरन्यासोऽलंकारः। ५८। अथ

करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रु ताभिः॥ प्रकुपितमभिसारणे नुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः॥ ५८॥ असकलनयनेक्षितानि लज्जा गतमलसं परिपांडुता विषादः॥ इति विविधमियाय तासु भूषां प्रभवति भूषयितुं वधूरनंगः॥ ५९॥

आसां मनुरागदार्ढ्यं निरूपयति। असकलेति। असकलनयनेक्षितानि नयनार्धविलोकितानि लज्जा अलसं गतं परिपांडुता पांडुरवर्णत्वं विषादः इष्टानवाप्तिनिमित्तजो चेतोभंगः इत्येवंप्रकारं विविधं नानाचेष्टितं नपुंसकमनपुंसकेत्यादिना नपुंसकैकशेषः। तासु भूषां इयायेति भावः। प्राधान्येन योज्यं। तथा हि। अनंगो वधूर्भूषयितुं प्रभवति। सर्वास्ववस्थासु इति शेषः। अतः तासां अनंगभूषितानां अखिलं भूषणमेवेति भावः। ५९।

इदानीमेतानांत्रिभिर्मुनिविलोभनप्रयासवैफल्यमाह।अलसेति।वधूनांसंबं।धिप्रकृत्या।अलसैः पदैःमनोरमं
अतएवराजितानिकलहंसवधूनांगमनानियेनतत्प्रयातंगमनंउरूणाः विपुलस्यजघनस्थलस्यातिभारात्दिति गो
रवात्उदितेनपरिश्रमेणाजिह्मितेघूर्णितेनेत्रप्रसरणेलोचनेयस्मिन्तत्स्थितंवास्थितिश्चसर्वत्रवानृाष्टः समु
च्चये।६०।भ्रूनेति।तथाभ्रूनानगाढेनकुसुमशरस्यइषोःपातेनयोमोहः मूर्छातस्माद्धेतोरनवसितार्थैः अस्फुटोच्चार
णादनवधारितार्थैः पदैः प्रभिन्नराष्ट्रैः आकुलः संकीर्णः।अभिलापोवाक्यप्रयोगश्चाधिकंविततेविस्तृतेविलो

अलसपदमनोरमंप्रकृत्याजितकलहंसवधूगतिप्रयातं॥स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मि
तेक्षणंवा॥६०॥भ्रूनकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोभिलापः॥अधिकविततविलोचनंवधूनाम
युगपदुन्नमितभ्रुवीक्षितंवा॥६१॥रुचिकरमपिनार्थवद्बभूवस्तिमितसमाधिशुचौपृथात्तनूजे॥ज्वलयतिमहतांम
नांस्यमर्षेनहिलभतेऽवसरंसुखाभिलाषः॥६२॥
चनेयस्मिन्तत्।अयुगपत्पर्यायेणोन्नमितेभ्रुवौयस्मिन्तत्तथो
क्तं।रूस्नोनपुंसकस्येतिह्रस्वः।वीक्षितंवीक्षणंवा।६१।रुचिकरमिति।पूर्वोक्तंरुचिकरंस्पृहाजनकमपिरुचिः का
त्यर्चिर्भासितिस्त्रीलिंगत्रिभिकेस्पृहार्थयोरितिवैजयंती।स्तिमितेननिश्चलेनसमाधिनातपोयोगेनशुचौशुद्धेनिर्वि
कारचेतसीत्यर्थः।पृथातनूजेअर्जुनेविषयेअर्थवत्प्रयोजनवन्नबभूव।तथाहि।महतांधीराणांमनांसिअम
र्षेक्रोधेज्वलयतिसतिसुखाभिलाषोवसरंअवकाशंनलभते।किंतुरौद्रस्यशृंगारविरोधित्वादितिभावः।अत्र

किराता- (vertical, right margin)

स्वयमिति। ।एवं हरिसुतेर्जुनेस्वयं अखंडेन अविलुप्तेन तपसा ज्ञातमखमिंद्रं संराध्य प्रीणयित्वा। परोछित्या
लभ्यां ज्ञात्रुवधेन लभ्यां साध्यां लक्ष्मीं अभिलषति सति सोद्वेगैः कार्यसिध्यभावात् सोद्विग्नैर्मनोभिरुपल

त्रिभिर्विशेषकं॥ स्वयं संराध्यैवं ज्ञातमखमखंडेन तपसा परोछित्या लभ्याम
भिलषति लक्ष्मीं हरिसुते। मनोभिः सोद्वेगैः प्रणयविहतिध्वस्तरुचयः स
गंधर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः॥ ६३॥ ॥इति श्रीकिरातार्जुनी
ये महाकाव्ये भारविकृतौ दशमः सर्गः॥ ॥श्रीचंद्रलांबार्पणमस्तु॥ ॥

क्षिताः किं च प्रणयविहत्या प्रार्थनाभंगेन ध्वस्तरुचयो नष्टकांतयः सगंधर्वाः त्रिदशवनिताः स्वं धाम स्वस्थानं प्रतिय
युः। शिखरिणी वृत्तमेतत् रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी इति लक्षणात्। ।इति श्रीमहोपाध्या
य कोलाचलमल्लिनाथसूरिविरचितायां घंटापथसमाख्यायां सुरांगनागमनं नाम दशमः सर्गः। श्रीरस्तु।

श्री चंद्रकलापरमेश्वर्यै नमः॥ ॥अथेति॥ ॥अथाप्सरसां प्रयाणानंतरं पाकोनामा कश्चिद्राक्षसः तस्य शास
नः इंद्रः नंद्यादित्वाल्ल्युप्रत्ययः। तया अप्सरसां मुखभंगतया अमर्षात् विद्विषः रोषात् निसर्गाच्च या जितेंद्रिय
ता तया आगंतुकानागंतुकोभयविधहेतुकया प्रतीतो हृष्टः सन्। ख्याते हृष्टे प्रतीतः स्यादित्यमरः। जिष्णो
रर्जुनस्य। जिष्णुः शक्रे धनंजय इत्यमरः। आश्रमं आजगाम। अमर्षनिसर्गयोर्जितेंद्रियत्वाहेतुकं रुचि

।श्री। अथामर्षान्निसर्गाच्च जितेंद्रियतयानया॥ आजगामाश्रमं जिष्णोः प्रतीतः पाकशा
सनः॥१॥ मुनिरूपोनुरूपेण सूनुना ददृशे हरिः॥ द्राघीयसा वयोतीतः परिश्रांत इवाध्वना॥२॥

करमपीति श्लोकद्वयवाक्यलिंगं स्फुटमवगम्यते॥१॥ इंद्रो मुनिरूपेण आजगामेत्याह। मुनिरूपेति। मुनेः रूप
मिव रूपं यस्य सः मुनिरूपो मुनिवेषधारीत्यर्थः। इंद्रो अनुरूपेण दर्शनप्रदानयोग्येनेत्यर्थः। सूनुना पुत्रेणा
र्जुनेन पुरोग्रे ददृशे दृष्टः। किंभूतः। वयो यौवनादिकं अतीतो वृद्धः। द्वितीयाश्रितेत्यादिना द्वितीयास
मासः। द्राघीयसा दीर्घेण प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः। अध्वना अध्वगमनेन परिश्रां
तः किलकिलेत्यलीकार्थ इव दूराध्वश्रांत इव स्थित इत्यर्थः॥२॥ श्रीगणेशार्पणमस्तु जयोस्तु॥

सादृश्यमिति । गंभीरैः मेघघोषैः गर्जितैः सादृश्यं दधति स्म उपमा दधतेः शतृप्रत्ययः । वान्नपुंसकस्येति वा नुमभावः
उन्निद्राः बृंहितश्रवणादेव प्रबुद्धाः क्षुभिताः संरब्धाः ये मृगाधिपाः तैः स्मृतानि तत्प्रतिबध्नंतीति भावः । अमरम
हेभबृंहितानि कच्छान्तान् अनूपान् जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः । चकिताः गर्जितशंकया
भीताश्चकोराः पक्षिविशेषाः नीलकंठा मयूराश्च येषु तान् तथाभूतान् आतेनुः । भ्रांतिमदलंकारो व्यज्यते ३९
धा शाखावसक्तेति । परिच्छिद्यते अनेनेति परिच्छदः परिकरो वसनाभरणादिः पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः घा

सादृश्यं दधति गभीरमेघनादैरुन्निद्रक्षुभितमृगाधिपस्मृतानि । आतेनुश्चकितचकोरनीलकं-
ठान् कच्छानानमरमहेभबृंहितानि ३९ शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधू-
जनसेवितानां जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानां ॥ ४० ॥
इति श्री किरातार्जुनीये म. लक्ष्म्यंके भा. सु. रां. गमनं नाम सप्तमः सर्गः ॥ ७ ॥

स्वा घञर्थे घुपसर्गे ह्रस्वः । शाखावसक्ताः कमनीयाः परिच्छदाः येषां तेषां अध्वनि श्रमः तेन आतुरैः पीडितैः वधू-
जनैः सेवितानां निवेशनविभागैः आवसतिकाच्छेदैः परिष्कृतानां अलंकृतानां [illegible] मानेभ्य [illegible] इत्यादिना सकृद्
वनपादपानां पुरे यदुपवनं तत्र जाता उपवनजा लक्ष्मीः जज्ञे जाता । अत्रान्योन्यलक्ष्मीसंबंधासंभवेन सादृश्याक्षे-
पात् संभवत्पूर्वकं वसंबध्येपि सन्निदर्शनालंकारः । वसंततिलकावृत्तं उक्तं वसंततिलका तभजा जगौ ग इति ४०
इति श्रीकोलाचलमल्लिनाथसूरिविरचितायां घंटापथसमाख्यायां सप्तमः सर्गः समाप्तिमगमत् । श्रीचंद्र...

॥ श्री ॥

[OrderDescription]
,CREATED=21.01.20 16:00
,TRANSFERRED=2020/01/21 at 16:13:00
,PAGES=108
,TYPE=STD
,NAME=S0002590
,Book Name=M-2435-KIRAT PRATHAM SARG SATIK PRARAMBH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,